संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 14

In Public domain. Digitization Muthulakshmi Research Academy

अद्वैतसुधानिधिः

तत्त्वसुधासहितं दक्षिणामूर्तिस्तोत्रम्, किरणावलीसहितम् अद्वैतोपदेशपञ्चरत्नम्,
सव्याख्यानम् आत्मबोधप्रकरणम्, दीपिकासहिता कैवल्योपनिषद्

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः

आचार्य के नीलकण्ठः

निदेशकः संस्कृत अकाडमी

सम्पादकः

जोषि भरद्वाजः

सहसम्पादकः परियोजना – अनुसन्धाता च

श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2022

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (ii) - 14
In Public domain. Digitization Muthulakshmi Research Academy

अद्वैतसुधानिधिः

तत्त्वसुधासहितं दक्षिणामूर्तिस्तोत्रम्, किरणावलीसहितम् अद्वैतोपदेशपञ्चरत्नम्, सव्याख्यानम् आत्मबोधप्रकरणम्, दीपिकासहिता कैवल्योपनिषद्

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः

आचार्य के नीलकण्ठः

निदेशकः संस्कृत अकाडमी

सम्पादकः

जोषि भरद्वाजः

सहसम्पादकः परियोजना – अनुसन्धाता च

श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2022

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamālā (ii) 14

Advaitasudhānidhiḥ

(Re-printing of rare book project)
This publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Advaitasudhānidhiḥ

ISBN – 978-93-80171-75-3

© Sanskrit Academy

Year : 2022
Pages : viii+107
Copies : 300
Price : Rs 250

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamālā (ii) - 14

Advaitasudhānidhiḥ

Tattvasudhāsahitaṃ Dakṣiṇāmūrtistotram, Kiraṇāvalīsahitam Advaitopadeśapañcaratnam, Savyākhyānam Ātmabodhaprakaraṇam, Dīpikāsahitā kaivalyopaniṣad

(Published under 'Re-printing rare books project' of Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief -Editor

Prof. K. Neelakantham

Director, Sanskrit Academy

Editor

Joshi Bharadwaj

Associate Editor & Project Investigator

K V Suryaprakash

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University Campus,

Hyderabad – 500 007

2022

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamālā (ii) 14

Advaitasudhānidhiḥ

(Re-printing of rare book project)
This publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Advaitasudhānidhiḥ

ISBN – 978-93-80171-75-3

© Sanskrit Academy

Year	:	2022
Pages	:	viii+107
Copies	:	300
Price	:	Rs 250

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः

।।श्री शङ्करभगवत्पादाः विजयन्ते।।

Advaita is a renowned philosophical system. And it refers to the non-dualistic school of Hindu philosophy. Chief source of this philosophy is Upanishads. And also the commentaries of Shankaracharya on the ten famous Upanishads, and on Brahma sutras and his commentary on Bhagavad gita, are the other important sources.

Shankaracharya and his paramaguru, Gaudapada, are the chief expounders of this theory of non-dualism or monism. Dvaita means duality, and Advaita means non-duality. It means absence of the duality between subject and object. Non duality of Brahman and Atman, Non-duality of the Seen and the Seer, Shankaracharya says he is describing about this concept in just one half sloka

श्लोकार्थेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।

ब्रह्म सत्यं जगन्मिथ्या। जीवो ब्रह्मैव नाऽपरः।।

Advaita Vedanta proclaims that Brahman is the one and only reality and everything else is a mere appearance, projection, formation or illusion. One of the most common examples used to describe the state is seeing a serpent in a rope when it is lying in the darkness. It is we who throw a serpent on the rope. The serpent is an illusion, and the rope is the reality. In the same manner the world appears in the mind as a formation over the

In Public domain. Digitization Muthulakshmi Research Academy
Self. Advaita Vedanta shows another effective example to establish that the Brahman alone is real, all else is but an illusion, ie the example of a mirage.

The school of Advaita also believes that Atman, the individual self, has no separate existence of its own. It is but a projection or reflection of Brahman only in each being. The jiva is a deluded soul by egoism, desires, and other impurities and thereby experiences duality and separation. And because of this each jiva is caught in the cycle of births and deaths and the laws of karma, and remains so until liberation is achieved. Being carried away by the power of the senses and mind, jivatmas do not perceive Brahman, the ultimate reality, who is hidden in all. When the senses along with the mind are fully withdrawn and made silent by constant practice, and detachment is acquired, purity and renunciation, comes to the jivas.

Thus purified jivas only can realize the Supreme Self hidden in all, and attain liberation. And to realize this oneness to get liberation from the cycle of births and deaths, and to attain supreme bliss, a guru is required. Advaita Vedanta strongly believes that an enlightened guru, having the knowledge of both the scriptures and Brahman, is indispensable.

उपदेक्ष्यन्ति तेऽज्ञानं...... Unless and until one is not enlightened by a sadguru, salvation cannot be achieved. It is said आचार्यवान् पुरुषो वेद! Many gurus,

In Public domain. Digitization Muthulakshmi Research Academy

who realized the truth of non-dualism and oneness of Jivatmas and Brahman, have composed volumes to explain the theory of this advaita Vedanta.

And Mandukya Karika of Gaudapada is considered to be the first available treatise on Advaita Vedanta, while the monumental works of Shankaracharya constitute its core literature. Successive generations of scholars enriched the school of Advaita through their teachings and scholarly works.

Now we are very happy to bring out **Advaita Sudhanidhi** which contains *Sri Dakshinamurty Stotra with Tattvasudha, Advaitopadesapancha ratna with Kiranavali, Atmabodhaprakarana of Sri Shankaracharya, Kaivalyopanishat with Dipika*. This book was published in the year 1898 by Sri Vadali Pattabhirama Dikshita from his own press Vedantaratnakaramudraksharashala Chennai.

We feel blessed for having an opportunity to publish this **Advaita Sudhanidhi** and very grateful to Dr. B. Shivaramakrishna Sharma garu for providing this book for publication. He has been a great inspiration to Sanskrit Academy. On behalf of Sanskrit Academy I convey my salutations to the great scholar.

I appreciate the honest efforts of Mr. Joshi Bhardwaj young scholar in our academy, made a thorough study of this **Advaita Sudhanidhi** and made this book ready for publication. The original book was published in Telugu script and it was very difficult to compose as the book was severely

In Public domain. Digitization Muthulakshmi Research Academy
damaged but Bharadwaj has taken sincere care and helped me to publish it.

I also congratulate and acknowledge the integrity of Sri K. V. Suryaprakash the senior research assistant in the academy and in charge of project of reprinting of rare books.

I thank all my colleagues Dr. V. Subrahmanyam, Dr. K. Varalakshmi deputy directors and Dr. Joshi Santhoshkumar reseach assistant. Constant service of all these devoted researchers is always praiseworthy.

I must record my sincere thanks to Prof. Srinivasa Varkhedi honorable Vice Chancellor of Central Sanskrit University, New Delhi who motivate us in the field of research and propagation of Sanskrit. And I am grateful to Prof. D. Ravinder, honorable V. C. and Chairman Management committee of Academy and Prof. Lakshminarayana Registrar of Osmania University for their encouragement. I thank Prof. Gayatri Muralikrishna director of Adarsha scheme in CSU New Delhi.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः
आचार्यों के नीलकण्ठः
निदेशकः

In Public domain. Digitization Muthulakshmi Research Academy

निवेदनम्

विदितमेव तत् समेषां विदुषां यत् श्रीमच्छङ्करभगवत्पाद कृत-दक्षिणामूर्तिस्तोत्रस्य प प श्रीस्वयम्प्रकाशयतिना तत्त्वसुधाख्या रचितेति। किन्तु श्रीमच्छङ्करभगवत्पादरचितस्य अद्वैतपञ्चरत्नस्य श्रीबालकृष्णानन्दसरस्वतीस्वामिना किरणावल्याख्या व्याख्या रचितेति। श्रीशङ्कराचार्यकृतात्मबोधप्रकरणस्य अज्ञातपण्डितेन व्याख्या रचितेति। कैवल्योपनिषद्दीपिका व्याख्या विरचितेति न विश्रुतमिति मन्ये।

श्रीमच्छङ्करभगवत्पादाः कविरिति प्रसिद्धमेव। अद्वैतोपदेश पञ्चरत्नव्याख्याता श्रीबालकृष्णानन्दसरस्वतीस्वाम्यपि सुकविरिति तेषां श्लोकदर्शनेन विज्ञायते। यथा –

मन्दस्मितमुखाम्भोजं रोमालङ्कृतवक्षसम्।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम्।।

सरलमृदुभाषया एताः व्याख्या अलङ्कृतास्सन्ति। यद्यपि आत्मबोधप्रकरणव्याख्या श्रीशङ्करभगवत्पादैः कृतेति मुखपत्रे वर्तते। किन्तु व्याख्यायां तथा नास्ति। अपि च शङ्करभगवत्पादैः स्वप्रकरणव्याख्याकरणं कुत्रापि न श्रूयते। अनेन व्याख्यानेन ग्रन्थार्थप्रतिपत्तिर्भवति। यथा – **मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते।** विधीयते विधिमुखेन आवश्यकतया प्रतिपाद्यत इत्यर्थः। इति व्याख्या समुचिता खलु। आत्मबोधव्याख्या मल्लिनाथसूरि

In Public domain. Digitization Muthulakshmi Research Academy
व्याख्येव नामूलं लिख्यते किञ्चित् नानपेक्षितमुच्यते इति रीत्या वर्तते।

किरणावलीव्याख्या तु श्लोकपञ्चकस्य सप्तविंशति पुटेषु विस्तृतया अस्ति। प्रार्थनाश्लोका एवात्रैकादश सन्ति। व्याख्यानेन अनेन उपदेशपञ्चरत्नं प्रकरणग्रन्थस्थानं लभते।

कैवल्योपनिषद्दीपिका व्याख्या प्रतिपदार्थं कथयन् उपनिषदर्थबोधिका भवति। यथा – हृत्पुण्डरीकं हृदयकमलं पञ्चछिद्रादिविशेषणम्। विरजं – विरजस्कमपगतरागद्वेषादिकं, विशुद्धं – विगतसमस्तदुःखादिदोषं, विचिन्त्य – विशेषेण ध्यात्वा इत्यादि। एवमद्वैतसुधानिधिः वेदान्तजिज्ञासूनामत नोपयुज्यते।

एते ग्रन्थाः प प योगानन्दघनेन्द्रस्वामिनां मननग्रन्था इति भाति। तदन्तेवासी वडाल्युपनामकपट्टाभिरामदीक्षितः स्वीयवेदान्तरत्नाकरमुद्राक्षरशालायां चेन्नपुर्यां 1898 तमे क्रैस्तवाब्दे मुद्रापयामास। अस्मत्प्राचीनपुस्तकभाण्डागारस्थित एष ग्रन्थः शिथिलो भवति। तच्छ्रुत्वा संस्कृत अकाडमी निदेशकवर्याः आचार्य नीलकण्ठमहोदयाः अद्वैतसुधानिधिं पुनर्मुद्रितुमायत्ता अभवन्। विद्वत्तल्लजा अर्हपदवीं प्राप्ताः ईदृशमुत्तमकार्यं घटयेयुः। नीलकण्ठमहोदयेभ्यः अकाडमी सदस्येभ्यश्च नमांसि भूयांसि।।

इत्थं निवेदयिता

डा बि शिवरामकृष्णशर्मा

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रमणिका

क्र.सं	विषयः	पु.सं
1.	Preface – Director	i
2.	निवेदनम् – डा बि शिवरामकृष्णः	v
3.	दक्षिणामूर्तिस्तोत्रम्	1
4.	अद्वैतोपदेशपञ्चरत्नम्	27
5.	आत्मबोधप्रकरणम्	63
6.	कैवल्योपनिषद्	93

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्री दक्षिणामूर्तिस्तोत्रं सव्याख्यानम्

मौनं व्याख्याप्रकथितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्ते वसदृषिगणैरावृतं ब्रह्मनिष्ठैः।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीढे।।1।।

कैवल्यानन्दयोगीन्द्रशुद्धानन्दयतीश्वरौ।
नत्वाऽऽरभे लघुव्याख्यां दक्षिणाशामुखस्तुतेः।।

इह खलु सर्वज्ञो भगवान् भाष्यकारः लोकानुग्रहैकप्रयोजनकृतशरीरपरिग्रहः सकलवेदान्तदुग्धोदधौ न्यायमन्दरेण विचारनिर्मन्थनादाविर्भूताद्वैतामृतस्य विन्यासकलशभूतं श्रीदक्षिणामूत्रिस्तोत्रं सकललोकानुजिघृक्षया भोक्तृजीवभोग्यजगद्भोगप्रदपरमेश्वरमोक्षगुरूणामत्यन्ताभेदबोधकं सकृत्पाठश्रवणार्थमननादिमात्रेण परमपुरुषार्थप्रापकमारभमाणस्तस्य वेदान्तसारभूतनवनीतपिण्डात्मकत्वेन तदीयविषयादिभिरेव तद्वक्ता सिद्धिमभिप्रेत्य आदौ प्रतीतसकलजगदधिष्ठानत्वेन परमेश्वरतां दर्शयन् दक्षिणाशामूर्तिपरमेश्वरं मनसा पूजयति विश्वं दर्पणेति।

विश्वं दर्पणदृश्यमाननगरी तुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया।

In Public domain. Digitization Muthulakshmi Research Academy

यस्साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।1।।

विश्वं विविधप्रत्ययगम्यं वियदादिसर्वमिदं जगत् निजान्तर्गतं, निजं स्वीयम् अन्तः मध्यङ्गतं प्राप्तं प्रत्यक्स्वरूपेण अवस्थितमिति यावत्। निर्विकारे नीरन्ध्रे अतिस्वच्छे अपङ्के सूक्ष्मे प्रतीचिजगति तद्विपरीतस्य स्थितौ तत्सदृशं दृष्टांशमाह।। दर्पणदृष्यमाननगरी तुल्यमिति।। दर्पणे अदर्शे नीरन्ध्रे असङ्गे स्वच्छे सूक्ष्मे निर्विकारे प्रतिबिम्बिता सती दृश्यमाना अवलोकमानायाः नगरी पुरी चतुर्दशसन्निवेशा सप्तवापीयुक्ता नानोपवना दक्षिणोत्तरा अतिमनोहरा मार्गद्वयविभूषिता मङ्गलद्वीपिकाद्वयविराजिता अनेकक्रीडाशिखरियुता नानाजनसङ्कुला क्वचिदष्टमार्गयुता च दर्पणे प्रतिबिम्बिता, या महानगरी तत्तुल्यं तत्समानम्। तदुक्तं भारतीतीर्थैः –

अच्छिद्रे दर्पणे भाति वस्तु गर्भे बृहज्जगत्।
सच्चित्सुखे तथा नानाजगद्गर्भमिदं वियत्।। इति।

वासिष्ठे विशीलोपाख्याने इदमुक्तम् –

द्यौः क्ष्मा वायुरथाकाशः पर्वतास्सरितो दिशः।
सन्ति तस्मिन् पृथक्सत्ता नैव दृश्यस्य कर्हिचित्।।
अप्यत्यन्तघनाङ्गायास्सुनीरन्ध्राकृतेरपि।
विद्यतेऽन्तर्जगद्वृन्दं व्योम्नीव विततेऽनिलः।। इति

In Public domain. Digitization Muthulakshmi Research Academy

ननु प्रतीचोन्तरे यदि विश्वं तिष्ठति तर्हि रागादिवदन्तरेवानुभूयतेत्याशङ्क्याह **आत्मनीत्यादिना।** आत्मनि स्वप्रकाशे प्रतीचिविषये आश्रये च या माया अविद्यासूर्ये पेचकादीनामन्धकारप्रतीतिवन्मामहं न जानामीति भ्रमानुभवसिद्धतया मायायाः बहिस्स्वप्नाद्बाह्यदेशे उद्भूतमिव आविर्भूतमिव पश्यन् अवलोकयन् य इत्युत्तरत्र संबन्धः। अन्तर्विदं जनस्य जगतः बाह्यत्वेनानुभवे दृष्टान्तमाह। यथा **निद्रयेति।** यथा निद्रया स्वाप्नं जगत्। साक्षिणि स्वस्मिन्नध्यस्थतया स्थितमपि स्वस्माद्बहिः स्थितमिवानुभवति तद्वदेवेदं जाग्रत्प्रपञ्चमतस्मिन्प्रत्यक्चैतन्येन सह संयोगाद्यन्यतमसम्बन्धाः सम्भवेन प्रतीचस्सकाशाज्जगद्भानं स्यात्। तत्राध्यस्तमेव तत्। तथा च प्रत्यगात्मानं प्रकृत्यश्रुतिर्भवति।

पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रम्।
आधारमानन्दमखण्डबोधं यस्मिन् लयं याति पुरं त्रयञ्च।।
एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी।
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।।
मयि सर्वं लयं यातीत्यादि पुराणवचनञ्च।।
यथा स्वप्नप्रपञ्चोऽयं मयि माया विजृम्भितः।
एवं जाग्रत्प्रपञ्चश्च मयि माया विजृम्भितः।। इति

In Public domain. Digitization Muthulakshmi Research Academy

ततः प्रतीच्येव जाग्रत्प्रपञ्चो अध्यस्तः अनुभूयते भ्रान्ताः बहिरिवेति भावः। ननु स्वात्मनि प्रपञ्चो अध्यस्तश्चेत् बाध्येत, बाधो न कदाचिदनुभूयते। अतः न आत्मनि अध्यस्तः। किं तं बहिः परमार्थ एव। न विद्यते इत्याशङ्क्य यथा स्वप्नप्रपञ्चो अध्यस्तोऽपि सदा सत्य इव भाति। प्रबोधसमये बाध्यते तथैवायमपि जाग्रत्प्रपञ्चः तत्त्वज्ञानात्पूर्वं सत्यत्वेन भातोऽप्याचार्येण परमदयालुना साक्षात्परमेश्वरावताररूपेण उपदिष्टतत्त्वमस्यादि-महावाक्यजन्यप्रत्यग्ब्रह्मैक्यसाक्षात्कारसमये समूलं बाधितस्सन् प्रत्यगभिन्नाद्वितीय ब्रह्ममात्रतयोपरि परिशिष्यत इत्याभिप्रेत्याह **यस्साक्षादित्यादिना**। यः अध्यस्तप्रपञ्चाधिष्ठानभूतः प्रत्यगात्मा प्रबोधसमये गुरूपदिष्टमहावाक्यात् ज्ञानोत्पत्तिकाले अद्वयं सर्वप्रपञ्चस्य समूलस्य बाधितत्वेन वियदादिद्वयरहितस्वात्मानमेव वियदाद्यधिष्ठानभूतब्रह्माभिन्नसच्चिदानन्दात्मकं प्रत्यञ्चमेव साक्षात्कुरुते सच्चिदानन्दात्मकं ब्रह्माहमस्मीत्यप्रतिबन्धेन अव्यवधानमनुभवति। यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं जीवेत् तत्केन कं पश्येदित्यादि श्रुतेः। तस्मै उक्तरूपाय श्रीगुरुमूर्तये श्रीगुरुः ब्रह्मरूपत्वेन त्रिविधपरिच्छेदशून्यः ज्ञानोपदेष्टा पुरुषः तन्मूर्तये तद्रूपेणावस्थिताय दक्षिणामूर्तये दक्षिणदिगभिमुखा-मूर्तिर्विग्रहो यस्य तस्मै। **परमाद्वैतविज्ञानं कृपया वै ददाति यः। सोऽयं गुरुर्गुरुस्साक्षाच्छिव एव न संशयः** इत्यादिवचनशतेभ्यः

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानोपदेष्टा पुरुषस्साक्षात्परमेश्वर एव, अथवा श्रीमते सच्चिदानन्दात्मका गुर्वी अतिमहत्तरामूर्तिः स्वरूपं यस्य स तथा तस्मै गुरुमूर्तये अनाद्यचिन्त्य मायाशक्त्या दक्षिणः सृष्टिस्थित्यन्तविरचना निर्गुणश्चासौ परमार्थतः अमूर्तिकाश्च आकारविशेषरहितः अस्थूलमनण्वित्यादि श्रुतेः। स दक्षिणामूर्तिः तस्मै इदं नमः प्रह्वीभावश्च अस्त्विति शेषः। प्रह्वीभावश्च स्वात्मनः परमेश्वरे एकत्वेन समर्पणम् अत्र च पूर्वार्धेन त्वं पदार्थ उक्तः। अत्र गुरुमूर्तये श्रीदक्षिणामूर्तये इति पदद्वयेन मूर्तिद्वययुक्तस्तत्पदार्थ उक्तः। स्वात्मानमेवाद्वयमिति पदद्वयसामानाधिकरण्येन यत्तच्छब्दाभ्याञ्च प्रत्यग्ब्रह्मैक्यलक्षणः वाक्यार्थ उक्तः। सकलवेदान्तप्रसिद्धो अयमेवार्थः उत्तरश्लोकैः प्रपञ्च्यते।

दर्पणदृश्यमाननगरी तुल्यं निजान्तर्गतं विश्वं यथा निद्रया तथा आत्मनि मायया बहिरुद्भूतमिव पश्यन् यः प्रबोधसमये अद्वयं स्वात्मानमेव साक्षात्कुरुते तस्मा इदं नम इत्यन्वयः। एवमेवास्यार्थो वार्तिककारेण सङ्गृह्योक्तः।

ईश्वरो गुरुरात्मेति मूर्तिभेदाद्विभा(गि)विने।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नम।। इति।1।।

नन्वात्मनि प्रपञ्चस्य अवस्थानं नोपपद्यते। तदकारणत्वात्, तथाहि – किमात्मा जगदारम्भकः उत तदाकारपरिणामी। नाद्यः

In Public domain. Digitization Muthulakshmi Research Academy
एकस्य विभोः चिद्रूपस्य जडप्रपञ्चारम्भकत्वासम्भवात्। नापि द्वितीयः। निरवयवनिर्विकारचिद्रूपस्य परिणामासम्भवात्। ततः नित्याश्चतुर्विधाः परमाणवो जगदारम्भका इति तेष्वेव तस्य स्थितिः। यद्वा प्रधानमेव जडं त्रिगुणात्मकं जगदाकारपरिणामि। तत्रैवेदं जगत्परमार्थतोऽस्ति। न तु चिदात्मनीति नैयायिकानां साङ्ख्यानां वा मतमाशङ्क्य न तावत्परमाण्वारम्भकवादः उपपद्यते। निरवयवानां तेषां सर्वात्मना संयोगे प्रधिमानुपपत्तेः। भिन्नयोर्गवाश्ववत्कार्यकारणभावायोगात्। पूर्वमसतः कार्यस्य शशविषाणवदुत्पत्यनुपपत्तेः अत्यन्तभिन्नकार्यस्यारम्भे कार्ये कारणस्य गुरुत्वादिव द्वैगुण्यापत्तेः। परमाणुसद्भावे प्रमाणाभावाच्च कार्यद्रवस्य स्वन्यूनपरिमाणारब्धत्वनियमस्य स्थूलतूलपिण्डारब्ध-तन्त्वादावदर्शनाच्च सोऽपि प्रधानपरिणामवादः। तस्य चेतनानधिष्ठितस्य कार्योत्पादे स्वतो असामर्थ्यात्। लोके रथादेश्चेतनाधिष्ठितस्यैव प्रवृत्तिदर्शनात्। तत्सद्भावे प्रमाणाभावात्। अजामित्यादिश्रुतेश्च तेजोबन्नादिप्रकृतव्याकृतपरत्वाच्च। किन्तु श्रुतौ 'सत्यं विज्ञानमानन्दं ब्रह्म', 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः', 'सदेव सोम्येदमग्र आसीत्', 'तदैक्षण बहुस्यां प्रजायेयेति', 'यतो वा इमानि भूतानि जायन्ते', 'यस्सर्वज्ञस्स सर्ववित्', 'यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नञ्च जायते' इत्यादिषु सहस्रशः परमात्मन एव चेतनाज्जगदुत्पत्तिश्रवणात्।

In Public domain. Digitization Muthulakshmi Research Academy

विलक्षणयोरपि कार्यकारणभावस्य गोमयवृश्चिक पुरुषलोमादौ दर्शनात्। आरम्भपरिणामव्यतिरेकेण तत्त्वतोप्यन्यथाभावलक्षण विवर्तरूपप्रकारस्यापि कार्योत्पादे स्वप्नशुक्तिरजतादौ दर्शनात् उपादान समसत्ताककार्यापत्तिः परिणामः उपादानविशमसत्ताक-कार्यापत्तिर्विवर्तक इति अत्र विवर्तवादस्य विवक्षितत्वात् 'सर्वं तं परादाद्योऽन्यत्र आत्मनस्सर्वं वेदे'त्यादि श्रुतौ आत्मनोऽन्यत्र जगद्वेदनस्य निन्दितत्वात् घटोऽस्ति पटोऽस्ति घटस्स्फुरति पटस्स्फुरतीति सत्तास्फुरणानुविद्धतयानुभूयमानस्य जगतः मृदनुविद्धघटस्य मृत्कार्यत्ववत् स्फुरणरूपात्मकार्यस्यैव युक्तत्वाच्च आत्मैव जगदुत्पत्यादिकारणमित्यभिप्रेत्याह **बीजस्यान्तरिवेति**।।

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्गिर्विकल्पं पुन-
र्मायाकल्पितदेशकालकलना वैचित्र्यचित्रीकृतम्।
मायावीव विजृम्भयत्यपि महायोगीव यस्स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।2।।

इदं प्रतिभूयमानं सर्वं जगत्प्रागुत्पत्तेः पूर्वं निर्विकल्पं भोक्तृभोज्यादि विकल्परहितं आत्ममात्रमेव आसीत्। 'आत्मा वा इदमेक एवाग्र आसीत्। सदेव सोम्य इदमग्र आसीत्' इत्यादि श्रुतेः। तत्र दृष्टान्तमाह – **बीजस्येति**। बीजस्यान्तः बीजमध्ये अङ्कुर इव उपलक्षणमेतत्। पल्लवपत्रपुष्पफल शाखाविटपात्मकवृक्षः यथा उत्पत्तेः पूर्वं निर्विकल्पं बीजमात्रमासीत् तद्वत् पुनः पश्चात्

In Public domain. Digitization Muthulakshmi Research Academy

सृष्टिसमये मायाकल्पितदेशकाल-कलनावैचित्र्यचित्रीकृतम्। मायया ईश्वराधिष्ठिततया तत्कल्पितौ यौ देशकालौ तयोश्च कलनासम्बन्धः तद्वैचित्र्येण चित्रीकृतं नानाविधभेदभिन्नतया विभक्तम्। तं नामरूपाभ्यामेव व्याक्रियते इति श्रुतेः। कथमीश्वरस्य अद्वितीयस्य बाह्यसाधनरहितस्य जगदुत्पादकत्वं कुलालादेर्बाह्य-साधनवत एव कार्यकारणत्वदर्शनादित्याशङ्क्य ईश्वरस्य अनाद्यनिर्वचनीयमायाशक्त्युपहितस्य स्वेच्छामात्रेण ऐन्द्र-जालिकवद्देवर्षि पित्रादियोगिवच्च उपपद्यते जगदुत्पादकत्वमित्य-भिप्रेत्याह। मायाविवेत्यादिना यः परमेश्वरः मायावीव लोकप्रसिद्धैन्द्रजालिकमायाविवत् योगीव विश्वामित्रादिमहायोगिवत् स्वेच्छया स्वसङ्कल्पमात्रेण विजृम्भयति इदं जगदुत्पादयति। इन्द्रो मायाभिः पुरुरूप ई इयते तदा आत्मानं स्वयमकुरुत सच्चत्यच्चाभवत् इति श्रुतेः। नापि मायया तस्य सद्वितीयत्वं तस्यापि कल्पितत्वात् नापि तस्य कारणत्वं न विकारित्वं, जगत्कारणत्वस्य अनाद्यनिर्वचनीयमायाघटिततया कल्पितत्वेन उपलक्षणत्वस्य तत्र विकारानापादकत्वात्।

यावत्कार्यमवस्थायि भेदे हेतोरुपाधिता।
कादाचित्कतया भेदधीहेतुरुपलक्षणम्।।

ततश्च तत्र तस्यापि दोषस्याभावात् ब्रह्मैव प्रत्यगभिन्नं सकलजगदुत्पत्तिस्थितिलयहेतुरिति भावः। तस्मै नमः।।2।।

In Public domain. Digitization Muthulakshmi Research Academy

नन्वसत एव जगत्कार्यं पिण्डादिनाशादेव घटाद्युत्पत्तिदर्शनात् जागराद्यकालीनकार्यस्य असत्पूर्वकत्वदर्शनात् तद्दृष्टान्तेन जगतोऽपि तथात्वानुमानात् **असद्वा इदमग्र आसीत्** इति श्रुतेश्चेत्यसद्वादमाशङ्क्याह। **यस्यैव स्फुरणमिति।।**

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगम्भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान्।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।3।।

यस्य प्रत्यगभिन्नस्य परस्य स्वरूपभूतं सदात्मकं सद्रूपं स्फुरणमेव चैतन्यमेव असत्कल्पार्थगम् असत्कल्पाः असत्तुल्याः स्वतस्सत्तारहिताः अनिर्वचनीयाः ये अर्थाः वियदाद्याः कान् गच्छतीत्यसत्कल्पार्थगम् अनिर्वचनीयवियदादिप्रपञ्चनिष्ठमिति यावत् भासते प्रकाशते। अयं भावः जगतो सत्कारणत्वे घटो सन् पटो सन् इत्यसत एव सर्वत्रानुवृत्तिस्स्यात् न तु सतः। किञ्च तस्यासतोऽस्य प्रकाशत्वेन तत्र वर्तमानजगतः आन्ध्यमपि स्यात्। जगच्च सदनुविद्धं प्रकाशते तथा च स्वतस्सत्वप्रकाशयुतं जगदधिष्ठानभूतात्म-सत्यप्रकाशाभ्यामेव सत्ता प्रकाशवद्भवतीति। तत्र आद्यस्तत्वेन सत्कारणमेव जगत् नापि पिण्डादिनाशस्य घटादिकरणत्वम् अनुगतमृदादेरेव तत्कारणत्वात् जागराद्यकालीनस्य कार्यस्य असत्पूर्वकत्वं नास्मत् सम्मतं

In Public domain. Digitization Muthulakshmi Research Academy

सुषुप्तिकालीनसद्रूपात्मनः कारणत्वाङ्गीकारात् सुषुप्तावात्मसत्वस्य साधयिष्यमाणत्वात् **असद्वा इदमग्र आसीदिति** श्रुतिश्चानभिव्यक्त-सत्कारणपरा। **कथमसतस्सज्जायत** इति श्रुत्यैव असद्वादस्य प्रतिषेधादिति। अथवा घटस्सन् पटस्सन् इत्येवं सत्वेन प्रतीयमानस्य जगतः कथमसत्कल्पत्वम् अध्यस्तत्त्वेनोच्यत इत्याशङ्क्याह **यस्यैव** इत्यादिना। सत्प्रकाशरूपाधिष्ठानात्मसत्तेव आरोपितजगन्निष्ठतया प्रतीयते। न तु तस्य स्वतस्सत्वम् 'अधात अदेशो नेति नेति, 'नेह नानास्ति किञ्चने'त्यादिश्रुत्या प्रपञ्चस्य प्रतिषेधात् भ्रान्त्या तत्प्रतीत्युपपत्तेश्च तस्यासद्विलक्षणत्वाङ्गीकारात् न शशविषाणसमत्वं ततो परोक्षप्रतीतिरप्युपपद्यत इति तात्पर्यार्थः। अक्षरार्थस्तु पूर्ववत् ये यम् असत्ये प्रपञ्चे सत्यत्वबुद्धिः अनात्मनि देहादौ चात्मबुद्धिः इयमेव सकलसंसारनिदानमस्य च निवृत्तिः गुरूपदिष्टतत्त्वमस्यादिवाक्यजन्यापरोक्ष-ज्ञानेन मूलाज्ञाननिवृत्त्येवे-त्यभिप्रायेणाह – **साक्षादित्यादिना**। यः गुरुरूपः परमेश्वरः आश्रितान् विधिवदुपपन्नान् तत्त्वमसीति वेदवचसा यज्जगत्कारणमद्वितीयं ब्रह्म तत्त्वमसि न ततो भिन्नोऽसीति वेदवचसा वेदवाक्येन साक्षादेव अपरोक्षत्वेन तत्त्वं बोधयति, ज्ञापयतीत्यर्थः। ननु कथं सर्वज्ञत्वकिञ्चिद्ज्ञत्वाविविरुद्धधर्मकयोः जीवेश्वरयोः अभेदम् अयोग्यं वेदो बोधयतीति चेदुच्यते। सोऽयं देवदत्त इत्यादि वाक्यं तद्देशादिविरुद्धांशं त्यक्त्वा

In Public domain. Digitization Muthulakshmi Research Academy

अविरुद्धांशपिण्डमात्रमादाय भागत्यागलक्षणया यथा अभेदं बोधयति तथा तत्त्वमस्यादिवाक्यमपि जीवेश्वरयोः मायान्तःकरणाद्युपाधिं तन्निमित्तकं किञ्चिद्ज्ञत्वं सर्वज्ञात्वादि-विरुद्धांशं त्यक्त्वा उभयत्रानुगताविरुद्धचिन्मात्रादानेन अभेदं बोधयति अत्र महावाक्यार्थे विषये याः याः अनुपपत्तयः परैरुत्थापितास्तास्सर्वाः सर्वैः आचार्यैः सर्वत्र पराक्रम्यरसा इति न अस्माभिस्तत्र यत्यते सङ्ग्रहव्याख्याने प्रवृत्तत्वात् न स्वयं वाक्यजन्यज्ञानान्निवृत्तोऽपि संसारः सुषुप्तिप्रलययोरिव पुनरपि कदाचिद्भवेदित्याह **यस्साक्षादित्यादिना।** यस्य स्वप्रकाशनिष्प्रपञ्च-सदानन्दरूपस्य ब्रह्मणस्साक्षात्करणात् अपरोक्षतया सोऽहमस्मीति ज्ञानात् भवाम्भोनिधौ संसारसमुद्रे पुनः भूयः आवृत्तिरागमनं स्यात्, तरति शोकमात्मवित् ब्रह्म वेद ब्रह्मैव भवति। न स पुनरावर्तन इति श्रुतिभ्यः सुषुप्तिप्रलययोः मूलज्ञानस्य विद्यमानत्वात् पुनरुत्थानं तस्य वाक्यस्य ज्ञानेन अत्र नष्टत्वात् न मुक्तस्य पुनरुत्थानमिति भावः। तस्मै नम इति। तस्मै उक्तरूपाय गुरवे नम इत्यन्वयः।3।।

ननु जगतः कथम् आत्मसत्ताभानाभ्यां तद्वत्वम् आत्मनस्स्वत एव सत्ताप्रकाशौ जगतोऽपि भवेतामित्यशङ्क्य आत्मवज्जगतोऽपि स्वतस्सत्वे तद्वदेवोत्पत्तिविनाशानुपपत्तेः तद्वदेव च करणाद्यनपेक्षया सर्वदा भानप्रसङ्गात्। न स्वतस्सत्ताप्रकाशौ भवतो जगतः किन्तु आत्मसत्ताप्रकाशावेव जगतः सत्ताप्रकाशौ।

In Public domain. Digitization Muthulakshmi Research Academy
ननु एवं तर्हि सर्वस्य जगतः आत्मन्यध्यवस्तत्वे कथं करणाद्यपेक्षा, प्रकाशरूपात्मसंबन्धादेव सर्वं सर्वदा किमिति नाभायात्, सर्वगतचैतन्यस्याप्यविरोधेन अज्ञानावृतत्वे वा कथं वा कादाचित्कं जगतो भानम्, अज्ञानस्य चैतन्यातिरिक्तनिवर्तकाभावात् तस्य च अविरोधित्वात् इत्याशङ्क्याह **नानाच्छिद्रघटोदरस्थितमहादीप** इति।।

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वाराबहिस्स्पन्दते।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तिये नम इदं श्रीदक्षिणामूर्तये।।4।।

नानाच्छिद्रेति – नानाच्छिद्रघटोदरस्थितमहादीपप्रभा-भास्वरं नानाच्छिद्रस्य अनेकरन्ध्रयुक्तस्य, घटस्य कुम्भस्य उदरे अन्तस्थितो वर्तमानो यो महादीपस्तस्य प्रभेव भास्वरं भासनशीलं दीपवत्तमोविरोधिलक्षणप्रकाशस्वभावं यस्य परमेश्वरस्य घटवदनेकच्छिद्रयुक्तदेहे अन्तःकरणे प्रतिबिम्बितस्य साक्षित्वेनाव-स्थितस्य स्वरूपभूतं ज्ञानं चैतन्यं चक्षुरादिकरणद्वारा चक्षुःश्रोत्रादीनि यानि करणानि विषयोपलब्धिसाधनानि तद्वारा तच्छिद्रेण बहिः विषयदेशे स्पन्दते गच्छति इन्द्रियाणां विषयसम्प्रयोगे तद्वारा चैतन्योपाध्यन्तःकरणे गच्छति सति तत्प्रतिबिम्बितं चैतन्यमपि गच्छति। गत्वा च तं विषयं

In Public domain. Digitization Muthulakshmi Research Academy

भासयतीत्यर्थः। अयमभिप्रायः – चैतन्यं तु स्वतः अज्ञान-विरोध्यन्तःकरणप्रतिबिम्बितं सत्तद्विरोधि अत एवान्तःकरण धर्मारागादयः स्वसत्तायां सर्वदा भासन्ते घटपटादिविषयश्च बिम्बचैतन्ये ब्रह्मण्येवाध्यस्तास्तिष्ठति। अन्तःकरणेन चक्षुरादिद्वारा विषयदेशं गच्छता घटाद्यधिष्ठानबिम्बचैतन्यमुपाधीयते। तथा चैकोपाधिसम्बन्धादन्तःकरणे प्रतिबिम्ब्यवस्थितेन साक्षिचैतन्येन घटाद्यधिष्ठानचैतन्यमेकी भवति। ततस्साक्षिचैतन्ये न। तदज्ञाननिवृत्तौ घटादिविषयो भासते। न सर्वदा अतो अज्ञानावरणभङ्गार्थं चक्षुराद्यपेक्षा इति न कोऽपि दोषः। केचित्तु अचिद्रूपात्मनिष्ठज्ञानेन घटादिविषयो भासत इति वदन्ति तन्न। आत्मनिष्ठस्य जडस्य जडस्वप्रकाशस्य वा घटादिविषयेण संयोगादिसम्बन्धाभावात्। स्वरूपसम्बन्धस्य चातिप्रसक्तत्वात्। केचित्तु विषयनिष्ठस्फुरणेन घटादिभानमिति कथयन्ति तदपि न। विषयनिष्ठस्यात्मना सह संबन्धाभावेन अहं जानामीति सम्बन्धः। प्रत्ययानुपपत्तेः तस्मात् उक्तप्रकारेण स्वप्रकाशसाक्षिचैतन्य-सम्बन्धादेव घटादिविषयभानमिति। तदेतदाह जानामीत्यादिना घटादिकम् अहं जानामीति घटादिविषयस्य सम्बन्धितया भान्तं प्रकाशमानं तमेव साक्षित्वेन अवस्थितपरमेश्वरमेव अनुपश्चात् एतद्विविधशब्दप्रत्ययगम्यम्। समस्तं सर्वं जगत् भाति प्रकाशते अनुभानमपि न तस्य स्वतः। किन्तु अग्निं दहन्तमनु अयो

In Public domain. Digitization Muthulakshmi Research Academy
दहतीतिवदध्यासादेवेत्यर्थः। तथा च श्रुतिः।। **तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति तस्मै नमः।।4।।**

अत्र केचित् सर्वमिदम् अभित्तिचित्रं देहव्यतिरिक्तात्मन एवासम्भवात् देहस्यैव गच्छामि तिष्ठामि लङ्घयामि स्थूलोऽहं कृशोऽहमित्यात्मत्वानुभवादिति वदन्ति। अन्ये केचित् तान् हस्तेन वारयन्त आहुः। जीवात्मनिर्गमने शरीरमरणस्य दर्शनात्। वच्मि पश्यामि श्रुणोमीत्यादिबुध्द्यदर्शनात्। इन्द्रियाण्यैवात्मेति ततोऽप्यन्ये केचित्। ईषच्छब्दबुद्धयः चक्षुरादीन्द्रियनाशेऽपि प्राणसत्वेन जीवनदर्शनात्। अन्यथा अदर्शनात्। बुभुक्षितोऽहं पिपासितोऽहमित्यादिप्रतीतेश्च प्राण एवात्मेति भणन्ति। इतरे प्राणस्य बाह्यवायुवजडत्वेन भोक्तृत्वाद्यनुभवात्। मन एव चेतनं भोक्तृ चात्मेति प्रलपन्ति। योगाचार्यस्तु मम मन इति आत्मभिन्नतया प्रतीयमानस्य आत्मत्वासम्भवात्। क्षणिकविज्ञान-महमिति प्रतीयमानबुद्धिशब्दापरपर्यायः संसारीति जल्पति। तद्धिक्कृत्यान्यः कश्चिद्विद्युदभ्रनिमेषादिवत् क्षणिकस्य तस्यात्मत्वानुपपत्तेः। सुषुप्तौ तस्याभावात्। अन्यस्याप्यनुपलब्धेः शून्यमेवात्मेत्युद्गिरति। एते च स्वस्वपक्षदार्ढ्याय इतस्तत आदाय काञ्चिच्छ्रुतिमुदाहरन्ति। अन्ये च एतदन्यथाऽन्यथात्मस्वरूपं फणन्ति। एते सर्वे दैवोपहतचित्ताः भ्रान्ताः। सकलश्रुतिस्मृती-

Public domain. Digitization Muthulakshmi Research Academy

तिहासपुराणन्याय विद्वत्प्रत्यक्षविरुद्धार्थपरिग्राहकत्वात् न एतेषां मार्गः श्रेयोऽर्थिभिः स्वप्नेऽपि अनुस्मरीय इत्यभिप्रेत्याह- **देहं प्राणमपीति।**

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदु-
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।5।।

देहं सशिरस्कं पिण्डं प्राणं पञ्चवृत्तिकमुखनासिकासञ्चारिणं इन्द्रियाणि चक्षुरादीनि तत्तद्गोलकवृत्तीनि रूपादिग्राहकाणि चलां क्षणिकां सन्ततोदयां बुद्धिं विज्ञानं शून्यं तुच्छं चकारात्तार्किकाद्यभिमताज्ञानोपहितचैतन्यमात्मेति वादिनः भास्करादयः स्त्रीबालान्धजडोपमाः स्त्रीबालान्धजडवद्विवेकविज्ञान-रहिताः अत एव भ्रान्ताः तत्त्वमन्यथान्यथा प्रतिपद्यमानाः अहमिति विदुः – आत्मत्वेन जानन्ति अन्यानुपदिशन्ति च इत्यर्थः। नन्वेते वादिनः परीक्षका अपि किमित्वेवं नास्तिकास्सन्तोऽन्यथान्यथातत्त्वं प्रतिपाद्यन्त इति चेत् ईश्वरानुग्रहाभावात् ये तु आस्तिकाः श्रुतिस्मृत्युक्तमार्गकर्मानुष्ठानेन परं भगवन्तमेव सेवन्ते तेषां परमेश्वरप्रसादात् नैतादृशो व्यामोह इति अभिप्रेत्याह – मायेत्यादिना। मायाशक्तिविलासकल्पितमहा-व्यामोहसंहारिणे भगवतः परमेश्वरस्य अनाद्यनिर्वचनीयायाः

In Public domain. Digitization Muthulakshmi Research Academy
मायया: शक्तिः परव्यामोहिका तस्याः विलासेन एकदेशेन कल्पितो यो व्यामोहः महाननन्तपरमाणो व्यामोहः। देहाद्यात्मत्वभ्रमः तन्नाशयितुं शीलमस्येति तथोक्तः। तस्मै उक्तरूपाय गुरवे नमो अस्त्विति अन्वयः। तदुक्तं भागवते –

येषां स एव भगवान् दयते ह्यनन्त-
स्सर्वात्मनाश्रितपदो यदि निर्व्यलीकम्।
ते दुस्तरामतितरन्ति च देवमायां
नैषांममाहमिति धीश्श्वसृगालभक्ष्या।। इति।5।।

ननु शून्यवादिना सुषुप्तौ कस्याप्यनुपलम्भाच्छून्य एवात्मेति यदुक्तं तस्य किं समाधानमित्याशङ्क्य सुषुप्तौ आत्मास्तित्वं साधयन् समाधत्ते राहुग्रस्तेति।।

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो भूयात्सुषुप्तः पुमान्।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।6।।

यः पुमान् प्रत्यग्रूपः परमेश्वरः करणोपसंहरणतः विशेष-विज्ञानहेतुचक्षुरादिकरणानाम् उपसंहरणतः उपसंहारत् सन्मात्रः पूर्णानन्दादिरूपेण स्फुटप्रकाशमानतया केवलसन्मात्रेणातस्थितः सन् सुषुप्तौ अभूत् सुप्तिं प्राप्तौ अभूत् करणाभावेऽपि

पूर्णानन्दभानवतो मुक्तौ आत्मनः सकाशात् सुषुप्तात्मनो वैषम्यमाह **मायासमाच्छादनादिति**।। मायाया आवरणात्मिकामिथ्यायाः समाच्छादनात् सम्यगाच्छादनात् आवरणात् सन्मात्रम् इति सम्बन्धः। स्फुटमप्रकाशमानस्य स्वरूपतः सत्वे दृष्टान्तमाह **राहुग्रस्तेति**। राहुग्रस्तदिवाकरेन्दुसदृशः – राहुणा सैंहिकेयेन ग्रस्तौ यौ दिवाकरेन्दू सूर्यचन्द्रौ तत्सदृशः तत्समानस्सन् सुषुप्तोऽभूदिति संबन्धः। यथा राहुग्रस्तो दिवाकरश्चन्द्रो वा स्फुटं न प्रकाशते इत्येतावता दिवाकरस्य चन्द्रमसो वा न नास्तित्वं तद्वत्करणानामुपसंहारात् मायया आवृतत्वाच्च सुषुप्तौ स्फुटमात्मावभासत इत्येव तान् आत्मनो सत्त्वमित्यर्थः। ननु राहुग्रस्तस्य सूर्यस्य चन्द्रमसो वा स्फुटप्रकाशाभावेऽपि चक्षुषा विशेषतः सर्वैः ग्रहणादस्तित्वं न तद्वदात्मनः केनचित् सत्वमनुभूयत इत्याशङ्क्य सुषुप्तौ आत्मनोऽप्यविशेषतो भानं साधयति – प्रागस्वाप्समित्यादिना। यः सुषुप्तिकालीनात्मा प्रबोधसमये सुषुप्तितः उत्थानसमये प्रत्यभिज्ञायते, कथं प्राज्ञोऽहमस्वाप्सं सोऽहमिदानीं जागर्मीति। न च तदाननुभूतस्य प्रत्यभिज्ञानं संभवति। अन्यत्र देवदत्तादौ अननुभूते प्रत्यभिज्ञानादर्शनात्। न च तदाकरणेनात्मानुभवः इन्द्रियादि-करणानां सुषुप्तौ अभावात्। अतः स्वप्रकाशात्मनः सत्वान्न तदा शून्यत्वं नापि तस्य क्षणिकत्वम्, नापि जन्यत्वम् उक्तेरेव।

In Public domain. Digitization Muthulakshmi Research Academy
सुषुप्तिकाले सकले विलीने तमोऽभिभूतस्सुखरूपमेति। पुनश्च जन्मान्तरकर्मयोगात् स एव जीवः स्वपितप्रबुद्धः। सता सौम्य तदा सम्पन्नो भवतीत्यादि श्रुतिश्चात्मनः सच्चिदानन्दरूपत्वेन सुषुप्तौ अवस्थानं दर्शयति – आत्मनस्सुखरूपत्वं च उत्थितेनानुसन्धीयते। सुखमहमस्वाप्समिति अतो न कोऽपि दोष इति भावः।।6।।

इदानीं मुञ्जादिषीकामिव देहादिभ्यो विविच्य सच्चिदानन्दरूपं प्रत्यगात्मानं प्रदर्श्य तस्य परमेश्वराभेदं श्रुतिगुर्वीश्वरप्रसादलभ्यं प्रदर्शयन् आह **बाल्यादिष्विति।**

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तस्स्फुरन्तं सदा।
स्वात्मानं प्रकटीकरोति भजतां यो भद्रया मुद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।7।।

बाल्यं शैशवं तदादिषु शैशवकौमारयौवनस्थाविररूपासु जाग्रदादिषु, जाग्रत्स्वप्नसुषुप्तिमूर्च्छाजन्ममरणरूपासु, सत्वे वा अनुवर्तमानासु तथा अन्यास्वप्यवान्तरासु दर्शनश्रवणादिरूपासु कर्तृत्वभोक्तृत्वादिरूपासु च सर्वास्वप्यवस्थासु दशासु व्यावृत्तासु परस्परं व्यावृत्तमानासु अनुवर्तमानं अनुगततया सर्वास्ववस्थासु वर्तमानम्। अयं भावः- यो हि असत्यजडानन्दरूपासु सर्वास्वप्यवस्थासु व्यावृत्तमानासु योऽहं सुषुप्तस्वप्नमद्राक्षं सोऽहमिदानीं

In Public domain. Digitization Muthulakshmi Research Academy

जागर्मीत्यवस्थात्रयेऽपि – योऽहं बालो युवा चाभूवं सोऽहमिदानीं वृद्धोऽस्मीति बाल्यादिष्वपि च सत्वे वा अनुवर्तमानोऽनुभूयते। द्रष्टृत्वेनाभिमतेषु चक्षुरादिषु व्यावर्तमानेषु स्वयं तत्सकलसाक्षित्वेन यः चिद्रूपस्सदानुवर्तनोऽनुभूयते तथा प्रियत्वेनाभिमतवित्तपुत्र-पिण्डादिषु व्यावर्तमानेषु च यस्स्वयं सदा प्रीतिविषयः सर्वशेषित्वेन निरतिशयप्रीतिविषयतया आनन्दरूपत्वेन अनुवर्तमानोऽनुभूयते। तद्वदेवाहं बुद्धिविषयतयात्मत्वेन अभिमतेषु देहादिभोक्त्रन्तरेषु व्यावर्तमानेषु यश्च स्वयमहं बुद्धिमव्यभिचरन् सदात्मत्वेनानुवृत्तेषु अनुभूयते। ततः सद्रूपत्वं चिद्रूपत्वम् आनन्दरूपतया प्रियत्वम् अहं बुद्धिविषयतया प्रत्यक्त्वं च यः कदापि न व्यभिचरति स एव त्वं पदलक्ष्यार्थ आत्मेति भावः। तथा च तापनीयश्रुतिः। **तं वा एतमात्मानं जाग्रत्स्वप्नमसुषुप्तं स्वप्ने जाग्रतमस्वप्नं तुर्ये अजाग्रतमस्वप्नम् असुषुप्तमव्यभिचारिणं नित्यानन्दपदैकरसं ह्येष एव चक्षुषो द्रष्टाश्रोत्रस्य द्रष्टावाचो द्रष्टामनसो द्रष्टाबुद्धेः द्रष्टाप्राणस्य द्रष्टामनसो द्रष्टासर्वस्य द्रष्टेति।** एतदेवाहमहमित्यन्तस्फुरन्तं सदा अन्तश्शरीरादिषु मध्ये अहमिति अहंबुद्धिविषयत्वेन सदा सर्वेष्वपि कालेषु स्फुरन्तं भासमानं उपलक्षणमेतत् सत्यत्वेन प्रियत्वेन च सदा स्फुरन्तमित्यपि द्रष्टव्यम्। एवम्भूतं प्रत्यगात्मानं यः परमेश्वरः स्वात्मानमेव, स्वं-सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्मेत्यादिषु श्रुतिषु सच्चिदानन्दात्मकत्वेन त्रिविधपरिच्छेदशून्य-

In Public domain. Digitization Muthulakshmi Research Academy
तयावस्त्वप्रसिद्धः परमेश्वर एव आत्मा स्वरूपं यस्य प्रत्यगात्मनः न तु कर्त्रादिरूपेण प्रतीयमानः आत्मा स प्रत्यगात्मा तं स्वात्मानं ब्रह्माभिन्नमिति यावत्। भद्रया शोभनया करकलितज्ञानमुद्रया भजतां स्वभक्तानां प्रकटीकरोति। तेषां प्रत्यगानन्दब्रह्मस्वरूपत्वेन प्रकटं प्रकटीकरोति स्फोरयति तस्मै नमः इत्यन्वयः। बाल्यादिषु तथा जाग्रदादिष्वपि सर्वास्ववस्थासु व्यावृत्तासु अनुवर्तमानं सदा अन्तः अहमितिस्फुरन्तं भजतां प्रत्यगात्मानं यः भद्रया स्वात्मानं प्रकटीकरोति स्फोरयति तस्मै नम इत्यन्वयः।।7।।

ननु ब्रह्मव्यतिरिक्तं चेत्किमपि न वस्त्विति। तर्हि कथं परमार्थोपदेशादिव्यवहारः। न हि जातु कश्चित् तत्र सम्बन्धोऽस्ति, येन बन्धनिवृत्तये विद्योपदेशस्स्यात्। बन्धहेतोः कस्याप्यभावात्। नापि विद्यावतो मुक्तिस्सम्भवति, तद्धेतुगुरुशास्त्रादीनामभावात् इत्याशङ्क्य अनाद्यनिर्वचनीयपरमात्माध्यस्तमायावशादेव सर्वो व्यवहारो ब्रह्मसाक्षात्कारपर्यन्तं घटत इत्यभिप्रेत्याह विश्वं पश्यतीति।।

विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धत-
श्शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः।
स्वप्ने जाग्रति वा य एष पुरुषो माया परिभ्रामित-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।8।।

In Public domain. Digitization Muthulakshmi Research Academy

स्वोपाधिभूतमायया मलिनसत्वप्रधानकार्यकारणसङ्घाताकारेण परिणतया स्वेन प्रविष्टया भ्रामितः बहुविधं भ्रमं प्रापितः एष सर्वप्राण्यपरोक्षजीवस्सन् संसारित्वेन भातः विश्वं जगत्भेदतः बहुभेदभिन्नतया भ्रमेण प्रश्यति अवलोकयति। भेदमेव दर्शयति कार्यकारणतया इत्यादिना। अयमर्थः – यद्यपि परमार्थः नो ब्रह्मव्यतिरिक्तं किमपि नास्त्येव। **नेह नानास्ति किञ्चनेत्यादिना** श्रुत्या निषेधात्। अनाद्यनिर्वाच्याविद्यावशात् मुधैव भ्रान्तो जीवः वस्तुतो ब्रह्मैव सतो निखिलार्थसङ्कुलया मायया परिभ्रमितस्य स्वभ्रान्तिसिद्धगुरुशास्त्रन्यायादिभ्यो विद्योत्पत्तावविद्यावासना विवर्तते। निद्राणस्येव स्वाप्नव्याघ्रदर्शनसमुपजातभयेन प्रबुद्धस्य स्वप्नः तत्संसारान्मुक्तः स्वस्वरूपे सच्चिदानन्दात्मनि निरतिशयमहत्वसंपन्न एव रमणोऽवतिष्ठते। तदुक्तं सर्वज्ञात्ममुनिभिः तस्माद्ब्रह्मविद्यया जीवभावं प्राप्य स्थित्वा तौ अकेतुस्वरूपे त्वचित्वेन स्यन्दितं विश्वजातमाकाशादिक्ष्मावसानं च पश्येः। स्वीयविद्याकल्पित आचार्यवेदन्यायादिभ्यो जायते तस्य विद्याविद्याजन्मध्वस्त मोहस्य तस्य स्वीयरूपेन स्थितश्चित्प्रकाश इति, तत्सर्वस्य परमार्थतो ब्रह्ममात्रत्वेऽपि मायावशाद्भ्रान्त्या सर्वमुपपद्यत इति। कार्यं जन्यं, कारणं जनकं स्वगृहक्षेत्रधनादिस्वामी तद्वान् देवदत्तदिश्शिष्यः विद्याग्रहणार्थं विधिवद्गुरुमुपपन्नः

In Public domain. Digitization Muthulakshmi Research Academy
आचार्यः विद्योपदेष्टा पिता निषेक्ता पुत्रस्तच्छ्रुतसम्भव इत्यादिरूपे विश्वं यः पश्यति तस्मै नमः।।8।।

इदानीं मुक्तरूपब्रह्मापरोक्षज्ञाने मन्दाधिकारिणाम् अष्टमूर्त्युपासनं क्रममुक्तिदायकम् उत्तमाधिकारिणां श्रोतव्यादिश्रुति-सिद्धवेदान्ततद्विषयब्रह्मविचारस्साधनमित्यभिप्रेत्याह। **भोरं भांसीति।**

भोरं भांस्यवलोनिलोम्बरमहर्नाथो हिमांशुः पुमान्
नित्या भाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम्।
नान्यत्किञ्चन विद्यते विमृशतो यस्मात्तदस्माद्विभो
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।9।।

भूः पृथिवी, अम्बांसि जलानि, अनलोऽग्निः, अनिलो वायुः, अम्बरम् आकाशः, अहर्नाथस्सूर्यः, हिमांशुश्चन्द्रः, पुमान् सकलकर्मविद्याधिकारी जीवः इत्येवं क्रमेण यस्यैव परमेश्वरस्य सर्वज्ञस्य सर्वशक्तेः सच्चिदानन्दाद्वयस्य सदाशिवस्यैव मूर्त्यष्टकं मूर्तीनां विग्रहभूतानामष्टकमाभाति आसमन्तात् भाति। अयमर्थः - उपासकस्स्वदेहे वर्तमानपञ्चभूतव्यष्टिभूतानि तैः प्राणापानौ सूर्यशशाङ्काभ्यामेकीकृत्य पञ्चभूतात्मकशरीराभिमानिनं स्वामष्टमूर्तिं परमेश्वरेणेकीकृत्य सकलव्यष्ट्यष्टमूर्त्यात्मकसदाशिवोऽस्मीति चिन्तयेत्। ततो भावनातिशयेन तत्सायुज्यं प्राप्य सर्वैश्वर्यसम्पन्नो

Public domain. Digitization Muthulakshmi Research Academy

अन्ते तत्प्रसादादितत्त्वज्ञानेन तत्त्वसाक्षात्कारे मुच्यत इति तत्त्वं विधिवद्गुरुभ्यो युक्त्या च। अनिशं विचारयतां पुरुषाणां परस्मात्सर्वकारणाद्विभोः विविधप्रपञ्चात्मना भानवतः विवर्त-मानाद्यस्मात्सर्वाधिष्टानात् सच्चिनादानन्दत्मकात्परमेश्वरादन्यत् पृथक् किञ्चन न किञ्चिदपि विद्यते न। न भवति सर्वस्य तस्मिन्परमेश्वरे अध्यस्तत्वेन तन्मात्रत्वात्। तथा चोक्तं - महिम्नस्त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वम् आपस्त्वं व्योमत्वमवनिरात्मत्वमिति च । परिच्छिन्नामेवं त्वयि परिणतां बिभ्रति गिरं न विद्मस्तत्तत्वं वयमिह तु य त्वं न भवसि इति। **विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु।** यस्मात् परं नापरमस्ति किञ्चिद्यस्मान्नाणियो न ज्यायोऽस्ति किञ्चित् वृक्ष इव स्तब्धोदिविदिष्ठत्येकस्तेनेदं पूर्णम्। पुरुषेण सर्वं इत्याद्याः स्तब्धः निश्चलः दिवि आस्वकाशे स्वरूपे। तथा चोक्तरूपब्रह्मज्ञानात् उत्तमाधिकारिभिः इहैव सच्चिदानन्द-परमशिवरूपे अवस्थानलक्षणामुक्ति- रासाद्यते। अत्र ब्रह्मसमश्नुत इत्यादिश्रुतेरिति भावः। तस्मै गुरुरूपाय दक्षिणामूर्तये परमेश्वराय नमोऽस्त्विति।।9।।

इदानीम् एतत्स्तोत्रपाठादौ प्रवृत्तानां पुरुषधौरेयाणाम् अवश्यंभावि फलं कीर्तयन् स्तोत्रमुपसंहरति सर्वात्मत्वमिति।।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
येनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात्।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वत-
स्सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम्।।10।।

इत्युक्तप्रकारेणामुष्मिंस्तवे स्तोत्रे इदं श्रुतिषु इदं सर्वं यत् अयमात्मा इत्यादिषु श्रूयमाणसर्वात्मत्वं प्रत्यगात्मस्वरूपत्वं स्फुटीकृतं स्फुटमावेदितं यस्मात् तेनास्य स्तोत्रस्य श्रवणाद्गुरुतो विधिवच्छ्रवणात् तदर्थमननात् श्रुतस्य अर्थस्य युक्तिभिरनुचिन्तनात् ध्यानात् श्रवणमननाभ्यां निर्णीतस्य तथैव सोऽहं सर्वात्मा परमेश्वरोऽहमस्मीति विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययैक विषयाकरणात् सङ्कीर्तनात् सम्यक् गुरुभ्यः कथनाच्च सर्वात्मत्वमेव महाविभूतिः महती सिद्धिः। अणिमाद्यपेक्षया तस्य त्रिविधपरिच्छेदशून्यत्वात्तया सहितं युक्तमीश्वरत्वं सत्यज्ञानानन्द-लक्षणपरमेश्वरत्वं तच्छ्रुतिसिद्धम्। स्वत एव नित्यं विद्यमानं स्यात् भवेत् अनुज्ञायत इत्यर्थः। पुनः भूयः अष्टधा अष्टप्रकारेण परितं मायापरिणामरूपैश्वर्यं च अणिमादिसकलविद्वज्जनप्रसिद्धमव्याहतं क्वचिदप्यप्रतिहतं सिद्ध्येत्। स एकदा भवति त्रिधाभवति स यदि पितृलोककामो भवति सङ्कल्पादेव अस्य पितरः स तिष्टन्तीत्यादिश्रुत्युक्तं सर्वं भवेदित्यर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

एवमेषा कृता व्याख्या दक्षिणाशामुखस्तुतेः
यथामति तथा तुष्टो दक्षिणामूर्तिरस्तु नः।।

वामेन सीतां परिगृह्य बाहुना वामाङ्कलग्नां दृशिमुद्रयान्वितम्।
तत्वङ्करेणोपदिशन्तम् अद्वयं हनूमतो दाशरथिं भजेऽहम्।।

भास्वद्रत्नासनस्थं मणिनिकरलसत्सर्पहैमाङ्घ्रिभूषं
हेमाहिं चन्द्रसूत्रं विधृतकटिलसत्त्वाचकौसुंभचेलम्।
सान्द्रानन्दं स्वभक्ताभयवरदकरं स्मेरवक्रं त्रिनेत्रं
साम्बं चन्द्रार्कमौलिं स्फटिकमरकतानन्दमूर्तिं भजामि।।

इति

श्रीमत्परमहंसपरिव्राजकाचार्यकैवल्यानन्दयोगीन्द्रपादकमलभृङ्गाय
मानस्वयंप्रकाशयतिविरचितश्रीदक्षिणामूर्तिस्तोत्रव्याख्या
तत्त्वसुधाख्या समाप्ता।।

दैवतानि कति सन्ति नावनौ नैवतानि मनसा मतानि मे।
दीक्षितं जडधियामनुग्रहे दक्षिणाभिमुखमेव दैवतम्।।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

व्याख्यानकिरणावलीसनाथः

श्रीमदद्वैतोपदेशपञ्चरत्नप्रारम्भः

मन्दस्मितमुखाम्भोजं रोमालङ्कृतवक्षसम्।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम्।।1।।

पुण्डरीकाजिनधरं विलसत्फाललोचनम्।
ज्ञानमुद्राञ्चितकरं दक्षिणामूर्तिमाश्रये।।2।।

यत्प्रसादलवं प्राप्य प्रत्यूहजलधिं जनाः।
महारम्भा स्तुवन्त्येतं विघ्नेशमनिशं नुमः।।3।।

यां श्रियं न गजां वाचां देवीमाहुर्विचक्षणाः।
तां लोकमातरं वन्दे वाग्विभूतिप्रसिद्धये।।4।।

यदीयसूत्रविलसच्छास्त्रनावाभवाम्बुधिम्।
सन्तस्तरन्ति तं वन्दे पाराशर्यमहर्निशम्।।5।।

यदीयभाष्यविलसत्स्यन्दमानमरन्दतः।
विद्वद्भृङ्गस्तृप्तिमेति शङ्करं तमुपाश्रये।।6।।

यस्य प्रसादकणिका नौका तारयते सतः।
संसारसिन्धुं तं वन्दे सच्चिदानन्दयोगिनम्।।7।।

यस्योपदेशमाहात्म्याज्जडा अपि विनिर्गताः।
संसारबन्धात्तं वन्दे वासुदेवेन्द्रयोगिनम्।।8।।

क्वाहं क्व भगवत्पादकृतिगाम्भीर्यजन्मभूः।

In Public domain. Digitization Muthulakshmi Research Academy

तथाप्यत्रावगाहं मे काङ्क्षते खलु मानसम्।।9।।

महतां पक्षपातेन दुस्साधेप्यर्थकल्पने।
मम सामर्थ्यमस्यैव टिट्टिभोऽत्रनिदर्शनम्।।10।।

गुरुपादाम्बुजद्वन्द्वध्याननिर्मलमानसः।
आरचं पञ्चरत्नस्य विवृतं किरणावलिम्।।11।।

अथ खलु परमकृपालवो भगवन्तो भगवत्पादाः निखिललोकं संसारदावानलपरिपीडितमुपलभ्य आत्मज्ञानामृतमेव तदुपशमनं सुखसाधनं चाहुः। युक्तं च तत्। तस्यै तन्मूलाविद्या-निवर्तकत्वेन – तन्निवर्तकत्वात्। तदेव खलु साधकमन्यस्य तत्साधकत्वानुपपत्तेः। तथा हि – न धर्मस्सुखस्साधकः तत्फलस्य अनित्यत्वेन असुखत्वात्, यो वै भूमातस्सुखं नाल्पे सुखमस्तीति भूम्नः। सुखत्वमन्यस्यासुखत्वं च प्रतिपाद्य यो वै भूमा तदमृतम् ।अथ यदल्पं तन्मर्त्यमतिभूम्नः। नित्यत्वस्वाल्पस्यानित्यस्य च प्रतिपादनात्। तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति। कर्मफलस्यानित्यत्वश्रवणात्। अतोऽन्यथा अर्थमिति ब्रह्मव्यतिरिक्तस्य सर्वस्यानित्यत्वश्रवणाच्च। ननु अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति। अपामसोमममृता अभूमेत्यादौ कर्मफलस्यापि नित्यत्वं श्रूयते। ततः तस्यापि सुखत्वमस्त्येव। तथाप्यर्थोऽपि सुखसाधक एव धर्मादिहेतुत्वात्। कामस्य सुखहेतुत्वं प्रत्यक्षसिद्धमेव। यदि चार्थस्य

 In Public domain. Digitization Muthulakshmi Research Academy

राजादिनिमित्तदुःखफलत्वात् कामस्यापि व्याध्यादिद्वारा दुःखसाधकत्वात् तयोः सुखहेतुत्वेऽपि विषसंपृक्तमधुवदनुपादेयता, तथा माभूत्तयोः उपादानम्। धर्मस्योपादानं स्यादेव। तत्फलस्य नित्यत्वात् दुःखासंभिन्नत्वाच्च। श्रुतेः उभयफलनित्यत्वेऽपि तुल्यत्वाधर्मस्यैव ज्ञानोपयोगित्वावश्यंभावेन तद्धेतोरेवास्तु। तद्धेतुत्वं मध्ये किं तेनेति न्यायेन तत्साधकत्वाच्च धर्म एव सुखसाधको न ज्ञानमिति चेन्न। धर्मस्य सुखसाधकत्वानुपपत्तेः। तदेव हि सुखं यत् नित्यं भवति यो वै भूमा तत्सुखमित्यादिश्रुतेः। न हि धर्मस्य फलं नित्यं भवति। तद्यथेह कर्मचितो लोकः क्षीयत इत्यादि श्रुतेः। ननु कर्मफलनित्यत्वेऽपि श्रुतिरुदाहृता। अक्षय्यं चातुर्मास्ययाजिनः सुकृतमित्यादिस्सत्यम्। न सा स्वार्थं लभते। तया बाधितत्वात्। न च विनिगमनाविरहः श्रुतित्वाविशेषेण प्राबल्यदौर्बल्ययोः उभयत्रापि तुल्यत्वादिति वाच्यम्। अनित्यत्वप्रतिपादकश्रुतेः यद्यत् क्रियाजन्यं तत्तत् अनित्यमिति प्रत्यक्षदृष्टव्याप्त्युपोद्बलकत्वेन प्रबलत्वात्। न च नित्यताप्रतिपादकत्वे अनुग्राहकं प्रमाणमस्ति। नित्यताश्रुतेर्दीर्घकालमात्र पर्यवसन्नत्वात्। अश्वत्थामादिनित्यतावत्। अनित्यताश्रुतेश्चान्यदयतुमशक्यत्वा-दन्यथाभावश्च कुत्राप्यदर्शनात्। न च तर्हि नित्यताश्रुतेः स्वार्थप्रच्य-वादप्रामाण्यप्रसङ्गः रुच्युत्पादनद्वारा प्रवृत्युत्पादकतया तात्पर्यार्थ-बाधाद्वाच्यार्थे तात्पर्याभावादन्यथा चातुर्मास्यादेव सर्वे

In Public domain. Digitization Muthulakshmi Research Academy
प्रवर्तेरन्नान्यत्र तु श्रुतेश्चाथर्वणीस्थूलारुन्धतीन्यायेन **मन्त्रेषु कर्माणि कवयायानि अपश्यन् तानि त्रेतायां बहुधा सन्ततानि।** तान्याचरथ नियतं सत्यकामा इति नित्यफलप्रेप्सोः कर्मकारणमुक्त्वा अनेन कृतेन किं नित्यं फलं भवतीत्याकाङ्क्षायाम् **एष वः पुण्यस्सुकृतो ब्रह्मलोक** इति ब्रह्मलोकं फलत्वेन निर्दिश्य ततः **परं प्लवाह्येते अदृढा यज्ञरूपा** इत्यादिना यज्ञादीनाम् अनित्यफलत्वं प्रदर्श्य तत्साधने पुरुषार्थसाधनत्वं मन्यमानस्य जरामृत्युं ते पुनरेवापि यन्तीति संसारं प्रदर्श्य आत्मज्ञानमेव पुरुषार्थसाधनमाह। नास्त्यकृतः कृतेन तद्विज्ञानार्थमित्यादिना अतो न धर्मफलस्य नित्यत्वमतो न सुखसाधनत्वं धर्मस्य, अर्थकामयोस्तु प्रत्युक्तमेव। तथा च श्रुतिः। **नान्यः पन्था विद्यतेऽयनाय** इति एतेषां तत्साधनत्वनिषेधपुरस्सरं **तमेवं विदित्वातिमृत्युमेतीति** ज्ञानस्येव सुखसाधकत्वं दर्शयति। तत्फलस्य च नित्यत्वं प्रागेवोक्तम्। ज्ञानस्य साधनत्वोक्तिः औपचारिकीत्युत्तरत्र वक्ष्यते। अतः तत्साधनभूतज्ञानोपाय-मलोचयन्तः भगवत्पादाः प्रस्थानत्रयात्मकं ग्रन्थं निर्मितवन्तः तदनधिकारिणां केषाञ्चित् संसारदारिद्र्यनिर्दहनाय तर्ककूलवीचि-कलितात्पूर्वपक्षग्राहसमाकीर्णात् सिद्धान्तगम्भीरात् प्रस्थानत्रय-पयोराशेः पञ्चरत्नमद्भुतमाददुः। तत्स्वभावतः सकलमपि केषाञ्चित् मन्दमतीनां तदर्थाविष्करणाय प्रयतामहे। शास्त्रस्य तत्त्वबुभुत्सु-कथारूपत्वात् तदेवंभूतस्यास्य तत्प्रकरणत्वात् प्रकरणस्य

In Public domain. Digitization Muthulakshmi Research Academy

बालाधिकारतया बालस्य च जन्मान्तरकृतसुकृतमहिम्नातः जन्म-कर्तव्यजिज्ञासासंभवात् तादृशमेव अवनतं शिष्यं गुरुरुपदिशति। सोहपारोहणन्यायेन पुरुषार्थसाधनानि क्रमेण उपदिदृक्षुः वेदो नित्यमधीयतामित्यादिना।

वेदो नित्यमधीयतां तदुदितं कर्मस्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम्।
पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयताम्
आत्मेच्छा व्यवसीयतान्निजगृहात्तूर्णं विनिर्गम्यताम्।।1।।

व्या – बालस्य आदितः कर्तव्यं दर्शयति वेद इति। वेदः सार्थवादमन्त्रविधिकलापः – ब्राह्मणस्यापि विधिरूपत्वात् साङ्ग इति शेषः। अङ्गाध्ययनं विना अज्ञानानुत्पत्तेः। अर्थज्ञानस्य अनुष्ठानोपयोगित्वेन आवश्यकत्वात् सूचयति मूलकारो अध्ययनस्य ज्ञानपर्यन्तत्वं स्वनुष्ठीयतामिति। अर्थज्ञानाभावे सुष्ठु अनुष्ठानानुपपत्तेः। अङ्गानि शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति श्रुतिपठितानि। वेद इत्येकवचनं समस्तवेदाध्ययनाभावेऽपि एकस्य वा अध्ययनमावश्यकमिति सूचयितुम्। वेदान् अधीत्य वेदौ वा वेदं वा अपि यथाक्रमं अविप्लुतब्रह्मचर्यं इति वचनात्। एतस्य अध्ययनमपि स्वकुलीनात् आगतस्येति बोध्यम्। नित्यं सर्वदा विहितकाल इति शेषः। विहितेतरकाले निषेधात्।

In Public domain. Digitization Muthulakshmi Research Academy

आचार्यमष्टमी हन्ति शिष्यं हन्ति चतुर्दशी।
उभौ पञ्चदशी हन्ति प्रतिपत् पाठनाशिनी।।
मद्बोधने मच्छमने मदन्नपरिवर्तने।
स्वाध्यायं न पप्रकुर्वीत मन्वादिषु युगादिषु।।

इत्यादिवचनात्। अधीयतां त्वयैवेति शेषः। अन्यत्रापि क्रियापदेषु त्वयेत्यध्याहार्यम्। श्रुतिश्च **स्वाध्यायोऽध्येतव्य** इति अध्ययन-कर्तव्यतां च दर्शयति। ततश्च अधीतात्साङ्गाद्वेदात् तदर्थप्रतीतिः भवतीति भावः। ननु साङ्गो वेदो मया अधीतः अधीतात् तदर्थज्ञानं जातं ततो मम किं स्यात् इति आकाङ्क्षमाणं शिष्यं प्रत्याह। तदुदितं कर्म स्वनुष्ठीयतामिति। तेन अधीतेन वेदेनोदितं विहितं कर्तव्यतया प्रतिपादितमिति यावत्। विहितं च द्विविधं प्रत्यक्षविधिविहितम् अनुमेयविधिविहितं च। अर्थवादो उन्नेयविधिविहितस्यापि सत्वात् कर्म नित्यनैमित्तिकप्रायश्चित्तात्मकं काम्यकर्मत्यागस्य काम्ये मतिः त्यज्यतामित्युक्तत्वात्। नित्यं च कर्म द्विविधं श्रौतं स्मार्तं च। आद्यम् अग्निहोत्रादि, द्वितीयम् औपासनादि, नैमित्तिकं स्कन्नहोमोपरागस्नानादिप्रायश्चित्तं च। नैर्ऋतपश्वालम्भनादि-स्वनुष्ठीयतां स्वनुष्ठानं च कर्मणां साङ्गतयानुष्ठानमेव अङ्गवैकल्ये च कर्मणां सुष्ठुत्वानुपपत्तेः। श्रुतिश्च कर्मकर्तव्यतां दर्शयति। **कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा** इति। एवमुक्तं भवति साङ्गवेदाध्ययनानन्तरं तदर्थज्ञाने सति विद्वत्तायाः संपादितत्वादु-

Public domain. Digitization Muthulakshmi Research Academy

द्वाहानन्तरं विशिष्टकुलप्रसूतेन त्वयार्थिना समर्थेन स तासां कर्मानुष्ठेयमिति। ननु साङ्गकर्मानुष्ठानेन मम किमित्यत आह। तेनेशस्य विधीयतामपचितिरिति। तेन साङ्गमनुष्ठितेन कर्मणा ईशस्य परमेश्वरस्य अपचितिः पूजा विधीयतां विधानेन क्रियतामिति यावत्। ननु यज्ञादिकर्म स्वर्गाद्यर्थं भवति **ज्योतिष्ठोमेन स्वर्गकामो यजेत, सन्ध्यामुपासते ये तु सततं संश्रितव्रताः, विधूतपावास्ते यान्ति ब्रह्मलोकं सनातन**मिति श्रुतिस्मृतिभ्यः। अतस्तस्य कथं पूजार्थत्वमस्यार्थस्य अन्वर्थत्वानुपपत्तेः। न च नित्यानां कर्मणां निष्फलत्वात् स्वर्गाद्यर्थत्वानुपपत्तेः। श्रुतिस्मृती च रुच्यर्थे पूर्णाहुतिवाक्यवत्। न च **प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत** इति न्यायेन नित्यस्यापि प्रयोजनत्वं तदभावे प्रवृत्यनुपपत्तेरिति वाच्यम्। अकरणे प्रत्यवायश्रवणेन तन्निवृत्यर्थतया तत्र प्रवृत्तिरिति वाच्यम्। तर्हि तन्निवृत्तिरेव प्रयोजनत्वेन निष्प्रयोजनत्वाभावात्। श्रुतिसिद्धकार्याभावस्य स्वर्गादेः प्रयोजनत्वावश्यंभावाच्च। पूर्णाहुतिवाक्यसिद्धस्य सर्वकर्मादेः इतरकर्मसु यत्ननिवृत्यापातकतया इतरकर्मविधिवैयर्थ्यापादकत्वात् न प्रयोजनमिति चेन्न, यूपाद्यर्थस्य खादिरादेः द्रव्याद्यर्थत्ववत् अत्रापि स्वर्गाद्यर्थस्य यागादेः पूजार्थत्वाविरोधात्।

अपि च पूजा नाम नार्चा अपि तु फलत्यागः। एवं च यज्ञफलभूतस्वर्गादेः ईश्वरमुद्दिश्य स्वर्गत्यागसंभवात् न पूजार्थ-

 In Public domain. Digitization Muthulakshmi Research Academy

त्वानुपपत्तिरिति। ननु तदुचितं कर्मैत्यत्र नित्यनैमित्तिक-प्रायश्चित्तात्मकं कर्मैव कर्तव्यमिति प्रतिपादितं तदनुपपन्नम्। काम्यानामपि वेदोक्तत्वाविशेषतः कर्तव्यत्वात्। न च काम्यानां बन्धकत्वात् न कर्तव्यता अभिचारवदिति वाच्यम्। नित्यानामपि कर्तव्यत्वाविशेषेण बन्धकत्वापत्तेः। अभिचारस्य अनर्थजनकस्य वेदेनैव प्रतिपादितत्वात् काम्यानां तदप्रतिपादकत्वेन कर्तव्यत्वोपपत्तेः। न च नित्यानाम् अफलत्वात् न बन्धकत्वम्, काम्यानान्तु फलवत्त्वात् बन्धकत्वं युक्तमेवेति वाच्यम्। **चित्रया यजेत पशुकामः, विश्वजिता यजेत स्वर्गकाम** इत्यादिवत् **ज्योतिष्टोमेन स्वर्गकामो यजेत।** सर्वेभ्यः कामेभ्यः दर्शपूर्णमासावित्यादि श्रुतिबलात् नित्येऽपि फलसिद्धेः इयान् विशेषः। नित्यानामकरणे प्रत्यवायः काम्यकरणे स नास्तीति। न च नित्यकर्मफलस्य ईश्वरार्पणसम्भवात् न तद्बन्धकमिति वाच्यम्। काम्येप्युक्तन्यायस्य तुल्यत्वात्। तथा च काम्यमपि कर्म अनुष्ठेयमेव इत्यत्र आह – काम्ये मतिस्तज्यतामिति। काम्ये कर्मणि इति शेषः। मतिः कर्तव्यताबुद्धिरिति यावत्। अयं भावः **प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति** न्यायेन काम्यं कर्म कृत्वा तत् फलस्य ईश्वरार्पणापेक्षया काम्यकर्माकरणस्यैव युक्तत्वात्। **वीरहा वा येष देवानां योऽग्निमुद्वासयते अकुर्वन् विहितं कर्मैत्यादि** श्रुतिस्मृतिभ्यां नित्यनैमित्तिकाकरणे प्रत्यवायश्रवणेन तन्निवृत्यर्थतया

In Public domain. Digitization Muthulakshmi Research Academy

प्रायश्चित्ताकरणे तदनिवृत्त्या तेषां कर्तव्यतायां सिद्धायां याद‍ृच्छिक-फलस्येश्वरार्पणसम्भवात् इति। ननु इति यत्नसाध्ययज्ञादिफलस्य ईश्वरार्पणकृते सिद्धस्य परित्यागात् अन्यस्य कस्यचित् अलाभात् **सिद्धमन्नं परित्यज्य भिक्षामटति दुर्मतिरिति** न्यायादापन्न इत्यत आह। पापौघः परिधूयतामिति तेनेत्यनुवर्तनीयम्। तेन ईश्वरमुद्दिश्य परित्यक्तफलेन कर्मणा पापानां पापफलानामन्तःकरणदोषाणां रागादीनाम् ओघस्सञ्चयः परिधूयतां परित्यज्यतामिति यावत्। ईश्वरमुद्दिश्य फलत्यागेन चित्तगतदोषरूपानर्थनिवृत्तेः श्रेयो योग्यतायाश्च सम्भवात् न त्वयोक्तन्यायावतार इति भावः। ननु यज्ञादिकर्मणां स्वर्गाद्यर्थत्वात् स्वर्गस्य च सुखरूपत्वे पुरुषार्थत्वात् पुरुषार्थस्य कथं त्यागः सम्भवतीत्यत आह भवसुखे दोषोऽनुसन्धीयतामिति। भवे संसारे यत् सुखं विषयजं तत्र दोषः अनित्यत्वं दुःखसंपृक्तं वा अनुसन्धीयताम् अनुस्मर्यतामिति यावत्। अनित्यत्वं विषयकालीनत्वात् विषयाणां चानित्यत्वात्। तथा दुःखसंपृक्तत्वं च वैषयिकसुखार्थप्रवृत्तस्य व्याध्याद्यनेक-दुःखदर्शनात्। न च तस्योपादेयत्वं सम्भवति विषसंपृक्तमधुवत्। तथा च स्वर्गसुखस्यापि वैषयिकत्वेनानित्यत्वात् असुरादिनिमित्त-परिभवेन दुःखदर्शनेन तत्संवलितत्वाच्च तस्य त्यागेन भवितव्यम्। एवञ्च स्वस्य द्रव्यस्य राजादिनिमित्तार्थेन द‍ृष्टे सति सद्ब्राह्मणमाहूय दानवदीशमुद्दिश्यापि त्यागसम्भवादिति भावः। ननु

In Public domain. Digitization Muthulakshmi Research Academy

स्वर्गादिसुखस्यानित्यत्वात् दोषवत्वेन तस्य त्यागात् अन्यस्य कस्यचित् पुरुषार्थस्य अभावात् स्वस्याकृतार्थत्वमेव स्यादिति आकुलितमन्तेवासिनं प्रत्यात्मैव पुरुषार्थः। अतः तद्विषयकेच्छा त्वया कार्यैत्याह- आत्मेच्छा व्यसीयताम् । आत्मविषयकेच्छा स्वस्याभिलाषः व्यवसीयतां निश्चीयतां क्रियतामिति यावत्। आत्मनः पुरुषार्थत्वं च सत्यज्ञानानन्दस्वरूपत्वात् सत्यत्वं च कालत्रयाबाध्यत्वम्। इदं च बाह्यवादिव्यतिरिक्तैः सर्वैरपि स्वीकृतमेव ज्ञानत्वं च आदित्वादिज्योतिषामपि भासकत्वात्। तथा च श्रुतिः। **न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति**। आनन्दत्वं च परमप्रेमास्पदत्वात्। तथा च आत्मनः पुरुषार्थस्य लाभात् न त्वया तुरतया भवितव्यमिति भावः। ननु आत्मविषयकेच्छामात्रेण यदि पुरुषास्तर्हि गृहिणोऽपि ममात्मविषयकेच्छायाः सत्वेन पुरुषार्थलाभः स्यादित्यत आह निजगृहात्तूर्णं विनिर्गम्यतामिति। निजं स्वकीयं यद्गृहं वेश्म तस्माद्विनिर्गम्यतां विशेषेण निर्गमनं च सर्वथा आसक्तिराहित्यं बोध्यम्। अयं भावः। न केवलमात्मेच्छामात्रेण पुरुषार्थलाभः अतिप्रसङ्गापत्तेः, अपि तु तद्विचारात्। न चात्मविषयविचारो गृहासक्तिमतस्सम्भवति। गृहिणः पुत्रबाल्यादिषु व्याकुलचित्ततया एतद्विषयकविचारासम्भवात्। अतः त्वया तद्विचारार्थं गृहान्निर्गमः

In Public domain. Digitization Muthulakshmi Research Academy

कार्य एवेति। किञ्च तव दुस्सङ्गे दुष्टानां विषयलोलुपत्वात् तत्सङ्गिनः तवापि तदासक्तिरेव स्यात्। तथा च आत्मविषयविचार-प्रच्युतेस्तदानर्थ एव प्रसज्येत तदुक्तं भगवता– **सङ्गात्सञ्जायते कामः -प्रणश्यती**ति। तथा च तत्सङ्गपरित्यागेन सत्सङ्गस्त्वया कार्य इत्याह। सङ्गस्सत्सु विधीयतामिति।।1।।

सङ्गस्सत्सु विधीयतां भगवतो भक्तिर्दृढाधीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम्।
सद्विद्वानुपसेव्यतामनुदिनं तत्पादुके सेव्यतां
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरो वाक्यं समाकर्ण्यताम्।।2।।

व्या - सत्सु सत्पुरुषेषु सङ्गस्सङ्गः सहवास इति यावत्। विधीयतां क्रियतामिति यावत्। अयमाशयः अत्र सन्तो नामात्मविषयकविचारवन्त। एवं च सत्सङ्गेन तवापि तद्विषयकविचारः सुदृढो भवति। ननु दैवकृतविघ्नबाहुल्ये तद्विषयकविचारप्रवृत्तिरेव नोदेत् अस्तु वा प्रवृत्तिस्तथापि तत्फलं न सिध्येत् दैवबलाभावे सर्वस्य निष्फलत्वादित्यत आह भगवतो भक्तिर्दृढाधीयाताम् इति। भगः।

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसश्श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरितः।।

In Public domain. Digitization Muthulakshmi Research Academy

इति श्लोकोक्तवैराग्यादिषड्-रूपमुच्यते। सोऽस्यास्तीति भगवान् सद्गुणपरिपूर्णं परमेश्वरः अनेन भगवत्पादेन ईश्वरस्य सकलान्तरायनिवर्तनसामर्थ्यं द्योतितं भवति। तस्य परमेश्वरस्य भक्तिस्तदेकचित्तता दृढा निश्चला अधीयतां क्रियतामिति यावत्। ततः निश्चलेन भगवद्ध्यानेन सूर्योदयेनेव तमोराशेरन्तरायराशेः निवृत्तिसम्भवात् आत्मनि पुरुषार्थत्वनिश्चयात् तत्साधनात्मज्ञानर्थं तद्विचारे प्रवृत्तिसम्भवादुपासनाप्रसन्नदेवप्रसादबलात् सफलत्व-सम्भवाच्च न त्वदुक्तदोषावकाश इति भावः। न च ईश्वरार्पण-कर्मानुष्ठानादेव ईश्वरप्रसादसिद्धेः किमनया भक्त्या इति वाच्यम्। **अधिकं नैव दूष्यत** इचि न्यायेन भक्तेरप्युपयोगोपपत्तेः। प्रसादहेतु-बाहुल्येन प्रसादाधिक्येन वा विघ्नस्यात्यन्तिकनिवृत्तेः सम्भवात् च इति भावः। ननु रागादिकलुषचित्तस्य पुरषार्थविचाराभावेन तद्ध्यानाभावात् तत्साधने आत्मविचारे कथं प्रवृत्तिरित्याशङ्क्य कलुषनिवृत्त्युपायमाह। शान्त्यादिः परिचीयतामिति शान्तिरन्त-रिन्द्रियनिग्रहः। आदिशब्देन दान्तिर्बहिरिन्द्रियनिग्रहः गृह्यते। इतरेषां साधनानां मूलकारेणैव तत्र प्रतिपादितत्वात्। परिचीयताम् अभ्यस्यतामिति यावत्। तथा च अभ्यासेन शान्त्यादिलाभे कालुष्यनिवृत्तेः पुरुषार्थविचारयोगतायाश्च सम्भवात् तत्सिद्ध्यर्थं तद्विचारे प्रवत्तिः उपपन्नेवेति भावः। न च पापौघः परिधूयताम् इत्यत्रैव ईश्वरमुद्दिश्य फलत्यागादेव कालुष्यनिवृत्तेः प्रतिपादितत्वात्

In Public domain. Digitization Muthulakshmi Research Academy

पुनस्तन्निवृत्यर्थं शान्त्यादिकथनवैयर्थ्यमिति वाच्यम्। ईश्वरार्पण-कर्मानुष्ठानेन कालुष्यनिवृत्या शांत्याद्यभ्यासात् वा कलुषनिवृत्तिरित्यत्रैव तात्पर्यात्। अथवा पापौघः परिधूयतामित्यत्रैवं व्याख्येयम्। ननु तदुदितं कर्मेत्यत्र प्रायश्चित्तकर्माकर्तव्यमित्युक्तम्। तन्निष्पलमित्यत आह – पापौघः परिधूयतामिति। पापानां प्रमादकृतनिषिद्धकर्मणां जन्मान्तरार्जितानां वा ओघः सञ्चयः परिधूयतां परित्यज्यतामिति। तथा च कृतनिषिद्धकर्मनिवृत्तिफलत्वात् प्रायश्चित्तस्य तत् साधकत्वमेवेति वैफल्यशङ्कावकाश इति भावः। एवं व्याख्याने च पापशब्दस्य मुख्यार्थः सम्भवतीति ध्येयम्। ननु श्रुतिविहितयज्ञादिकर्मस्ववश्यकर्तव्येषु तद्वैकल्यनिमित्तप्रत्यवायभयेन तदासक्तचित्तस्य कथमात्मविचारेऽवकाशः स्यादित्यत आह दृढतरं कर्माशु सन्त्यज्यतामिति आत्मविचार-योग्यतानन्तरमिति शेषः। नित्यनैमित्तिकादिकं सर्वं कर्म दृढतरमपि विधितया परित्यक्तुमशक्यमपि बहुजन्मसुकृतमपि वा आशु शीघ्रतया विहितं कर्म कथं परित्याज्यमित्यालोचनां परित्यज्यैवेत्यर्थः। ननु विहितस्य कर्मणः कथं परित्यागः सम्भवति अकरणे प्रत्यवायश्रवणात्। न च सन्यासविधायकशास्त्रबलात् तस्य त्यागो भविष्यति। अन्यथा तद्विधिवैयर्थ्यापत्तिरिति वाच्यम्। काम्यकर्मत्यागस्यैव सन्यासशब्दार्थत्वात् तस्य च प्रत्यवायाभावेन परित्यागसम्भवात्। तदुक्तं भगवता – **काम्याणां कर्मणां न्यासं**

In Public domain. Digitization Muthulakshmi Research Academy

सन्यासं कवयो विदुरिति। न च कर्मत्यागस्यैव सन्यासशब्दार्थत्वेन काम्यकर्म एव त्याग इति सङ्कोचे मानाभावः। तर्हि कर्मत्वाविशेषाल्लौकिकव्यापाराणामपि त्यागापत्तेः। न च तेषां त्यागानुपपत्या तद्व्यतिरिक्तस्येव सन्यासशब्दार्थ इति वाच्यम्। तर्हि प्रत्यवायश्रवणेन नित्यानां कर्मणामपि त्यागासम्भवादेवं न कर्म त्यागस्य सङ्कोचे आवश्यके सति काम्यकर्मत्यागस्यैव सन्यासशब्दार्थत्वसम्भवादिति चेन्न। विहितस्यैव कर्मत्वेन सङ्कोचे मानाभावेन च सर्वकर्मत्यागस्यैव सन्यासशब्दार्थत्वाल्लौकिक-व्यापारस्य च अकर्मत्वेन तत्त्यागस्याशब्दार्थत्वात् सन्यासानन्तरं कर्माधिकाराभावे न नित्यादीनाम् अनुष्ठानयोगादधिकारिणैव कर्मणामनुष्ठेयत्वात्। तथापि **केन भगवन् कर्मण्यशेषतो विसृजानीति** कर्मत्यागप्रकारं पृष्टवन्तमारुणिं प्रति तव पुत्रान् भ्रातॄन् बन्धून् शिखायज्ञोपवीतं यागं सूत्रं स्वाध्यायं चेति। कर्माङ्गभूतशिखायज्ञोपवीतसूत्रस्वाध्यायानां निषेधं प्रजापतिराह – न हि वेदादिरहितस्य काम्ये नित्ये च कर्मण्यधिकारः सम्भवति। न चैवं नित्यकर्मत्यागे प्रत्यवायश्रवणं न स्यात् ध्यानादित्यागस्य त्वयैव विहितत्वोपादानादिति वाच्यम्। अविधिपूर्वत्याग एव प्रत्यवाय-श्रवणेन विधिपूर्वकत्यागे तदभावात् धार्यत्वेन विहितस्य कृष्णविषाणादेश्च त्वरे परित्यागस्यैव। न चाग्निष्टोमाद्यङ्गस्य विषाणादेरग्निष्टोमसमाप्तेः त्यागः सम्भवतीति वाच्यम्। एवमपि

 In Public domain. Digitization Muthulakshmi Research Academy

रक्तस्य यज्ञादिकर्मणां विधानेन विरक्तस्य तत्यागसम्भवात्। अधिकारिण एव तदकरणे प्रत्यवायश्रवणेन अधिकारिणस्तदयोगात् ब्राह्मणाधिकारके बृहस्पतिनवे क्षत्रियस्यैव। अस्य च लौकिकाग्निमदराग्नौ समारोपयेदित्यग्निसमारोपश्रवणेन कलत्रं चेति कलत्रस्यापि परित्यागश्रवणेन अग्निकलत्ररहितस्य यज्ञदानानधिकारात्। गायत्रीं च स्ववागग्नौ समारोपयेदिति गायत्र्या अप्युपसंहारश्रवणेन सन्ध्याकरणादौ दोषाच्च। न च यज्ञादिविधि-वैयर्थ्यं विधाय कस्य परित्यागश्रवणापेक्षया अविधानस्यैव युक्तत्वादिति वाच्यम्। अविरक्तस्य यत्किञ्चिद्विषयकप्रवृत्तिप्रसक्तौ यज्ञादौ नियम्यमानत्वात्। न च निषेधादुपनिषदामपि अध्ययनं तासामपि स्वाध्यायत्वादिति वाच्यम्। न हिंस्यात्सर्वा भूतानीति भूतहिंसामात्रं प्रतिषिध्य अग्निष्टोमीयं पशुमालभतेति प्रतिप्रसववदत्रापि स्वाध्यायाध्यनमात्रं निषिध्य प्रतिप्रसवेन स्त्रवेषु वेदेष्वावरणमावर्तयेत् उपनिषदमावर्तयेत् इत्युपनिषदध्ययनविधान-सम्भवात्। तथा च सन्यासविधिना नित्यकर्मत्यागसम्भवेन कर्मसु व्यासक्त्यभावात्। सावकाशतया आत्मविचारे निश्शङ्कं प्रवृत्तिरुपपन्नेवेति भावः। ननु अलौकिकपुरुषार्थविचारे कथं मम स्वत एव प्रवृत्तिस्स्यात् तज्ज्ञानाभावादित्याशङ्क्य तव तज्ज्ञानाभावेन स्वतः प्रवृत्यसामर्थ्येऽपि गुरूपदेशमाहात्म्यात् प्रवृत्तिसम्भवात् त्वया गुरुरुपसरणीय इत्याह सद्विद्वानुपसेव्यतामिति। सन् यो विद्वान्

In Public domain. Digitization Muthulakshmi Research Academy

उपसर्प्यतां प्राप्यतां प्राप्यतामिति यावत्। तदुपसर्पणं च सोपहारं कार्यं रिक्तहस्तेन **नोपेयादग्रजानां दैवतं गुरुमिति** स्मृतेः तद्विज्ञानार्थं स गुरुमेवावगच्छेत्। समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति च। ननु मया गुरुरुपगतोऽपि किमर्थं मम उपदिशेत् तस्य मदुपदेशेन प्रयोजनाभावत्। न च त्वया सोपहारतयैव गतत्वात् उपचारं दृष्ट्वातितुष्टः त्वामुपदेक्ष्यतीति वाच्यम्। विरक्तस्य त्वदुपहारेणापि प्रयोजनाभावात्। न च कृपासारस्य त्वद्दर्शन-मात्रेणोपदेशः सम्भवतीति न त्वया विचारः कार्य इति वाच्यम्। कृपाया अपि सहेतुकत्वात् दर्शनमात्रस्यापि अप्रयोजकत्वात् च इत्यत आह – अनुदिनं तत्पादुकासेव्यतामिति। तस्य गुरोः पादुकापादारविन्दं पादुकाशब्दे पादाधारवस्तुवाचिना पादारविन्दस्य लक्ष्यमाणत्वात्। अनुदिनं प्रतिदिनं स्वपादुकासेवनेन गुरोः कृपासम्भवात् त्वां दीनमुपदेक्ष्यतीति भावः। ननु अर्थिनं खलूपदिशति गुरुर्मया च किमर्थनीयमित्यत आह ब्रह्मैकाक्षरमर्थ्यतामिति। एके मुख्ये मुख्यार्थप्रतिपादकत्वादक्षरे ब्रह्म इत्येवंरूपे यस्य तदेकाक्षरं ब्रह्म ब्रह्मेति पदस्यार्थ अर्थ्यतां प्रार्थ्यतामिति। तथा च सार्थ ब्रह्मोपदेशो तदर्थस्य ज्ञातत्वेन तद्विषयकविचारसम्भवादिति भावः। यद्वा ब्रह्मणः यदेकमक्षरं वर्णात्मकमोङ्काररूपं तत्पदार्थमर्थ्यतामिति। अत्र अस्याभिप्रायः – पूर्ववदेवोन्नेयः अथ एकं च तदक्षरं चेति विशेषणसमासः एकं

In Public domain. Digitization Muthulakshmi Research Academy

सजातीयविजातीयस्वगतभेदरहितं न क्षरतीत्यक्षरं यद्ब्रह्म तदर्थ्यतामिति। ननु एतद्ब्रह्म मया अर्थितं तद्गुरुः कथं ममोपदेक्ष्यतीति तस्योपदेशयोग्यत्वादिति पृष्टवन्तं शिष्यं प्रति तत्प्रतिपादकं वाक्यमुपदिशति श्रुतिशिरोवाक्यं समाकर्ण्यतामिति। श्रुतेश्शिरः अन्तदेशः पर्यवसानदेशः वेदान्तः वेदमात्रस्य ब्रह्मण्यैव पर्यवसन्नत्वेन तत्प्रतिपादकत्वेन वेदान्तस्य वेदपर्यवसानदेशत्वमुपपद्यते। यद्वा श्रुतेश्शिरः उत्तमप्रदेशः वेदान्तः तस्य सर्वेत्तमब्रह्मप्रतिपादकत्वेन उत्तमत्वात् तस्य यद्वाक्यं तत्त्वमसीत्यादिरूपं स्वस्वोपनिषदुक्तं तत्समाकर्ण्यतां सम्यक् सावधानेनाकर्ण्यतां श्रूयतामिति यावत्। ततश्च व्युत्पन्नस्य तव वाक्यश्रवणमात्रेण तदर्थनिश्चयो भवेदिति भावः।2।।

ननु वाक्यस्य योऽयमर्थः त्वं तदसीत्येवंरूपः न सम्भवति। त्वं शब्दस्य जीववाचित्वात् तस्य च कर्तृत्वभोक्तृत्वकिञ्चिज्ज्ञत्वादिविशिष्टत्वात् तच्छब्दस्य च ईश्वरवाचकत्वात् तस्य च कर्तृत्वभोक्तृत्वादिरहितत्वात् सर्वज्ञत्वजगत्कारणत्वादिविशिष्टत्वाच्च। न च तयोः किञ्चिज्ज्ञत्वसर्वज्ञत्वादि-विशिष्टयोः कथमप्यसिपदेन अभेदो बोधयितुं शक्यः विरुद्धस्वभावत्वात् विरुद्धस्वभावयोश्च तेजस्तमसोरभेदादर्शनात्। न च जीवे किञ्चिज्ज्ञत्वादेः ईशे सर्वज्ञत्वादेश्च बाधे चैतन्यस्वरूपमात्रयोरभेदो विरुद्ध इति वाच्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणसिद्धधर्माणां बाधायोगात्। अन्यथा घटपटत्वादिधर्माणां बाधे स्वरूपस्य एकत्वसम्भवेन तयोः भेदो दत्तजलाञ्जलिः स्यात्। यदि च प्रमाणसिद्धस्य भेदस्यापरित्यागः तर्हि नाहमीश्वर इति प्रमाणसिद्धस्य जीवभेदस्य परित्यागायोग इति चेन्नेत्याह वाक्यार्थश्च विचार्यतामिति।

वाक्यार्थश्च विचार्यतां श्रुतिशिरः पक्षस्समाश्रीयतां
दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम्।
ब्रह्मास्मीति विभाव्यतामहरहर्गर्वः परित्यज्यतां
देहेऽहं मतिरुझ्झतां बुधजनैः वादस्समुत्सृज्यताम्।।3।।

अहंभावना निवृत्तिपर्यन्तमिति शेषः। वाक्यस्य तत्त्वमसीत्यादिरूपस्य योऽर्थः जीवपराभेदरूपस्स विचार्यतां विचार्य स्वरूपमेवेति निश्चीयतामिति यावत्। चकारात् तदर्थोऽपि विचार्यः तदर्थोप्येवंरूप इति निश्चेतव्य इति द्योत्यते। अयम्भावः – तत्त्वंपदवाच्यार्थयोः किञ्चिज्ज्ञत्वसर्वज्ञत्वविशिष्टयोः अभेदा-सम्भवेऽपि लक्ष्यार्थयोः अभेदस्सम्भवत्येव। यथा तद्देशतत्काले तद्देशतत्कालविशिष्टदेवदत्तस्वरूपयोः अभेदा-सम्भवेऽपि सोऽयं देवदत्त इति देवदत्तस्वरूपमात्रस्य लक्ष्यस्यैकत्वबोधः। तद्वत् न हि घटपटयोरभेदबोधकं प्रमाणमस्ति। येन लक्षणया अभेदबोधस्स्यात्। न किञ्चिज्ज्ञत्वसर्वज्ञत्वादिविशिष्टजीवेश्वर-

In Public domain. Digitization Muthulakshmi Research Academy

रूपव्यतिरेकेण जीवेशस्वरूपं नास्त्येव तल्लक्ष्यं स्यादिति वाच्यम्। दृश्यमानजीवेशरूपस्य कल्पितत्वेन तदधिष्ठानस्य पारमार्थिकस्य अवश्यमङ्गीकरणीयत्वात्। तथाहि न देहो जीवः उत्पत्तिविनाशवतः तस्य जीवत्वे कृताकृताभ्यागम-प्रसङ्गात्। नेन्द्रियाणि परस्परविलक्षणकार्यकर्तृणां तेषां योऽहं रूपमद्राक्षं स एवेदानीं स्पृशामीत्येकत्वेन प्रत्यभिज्ञानविषयत्वा-योगात् न मनः मम मन इति भिन्नत्वेन अनुभवात्। नाहङ्कारः जाग्रत्स्वप्नसुषुप्त्योः उत्पत्तिविनाशानुभवेन कालत्रयावस्थायिजीव-स्वरूपत्वायोगात् शून्यत्वे स्वस्यैव असत्वप्रसङ्गात्। अतः परिशिष्टं चिद्रूपमङ्गीकरणीयं तदेव पारमार्थिकरूपं जीवस्य। एवं प्रपञ्चस्य दृश्यत्वादसच्छेन्न प्रतीयेत शशशृङ्गवत्, सचेन्न नश्येत् ब्रह्मवत् सत्वमसत्वं चैकस्य विरुद्धमित्यतो निर्वचनीयत्वात् शुक्तिरजतवत् कल्पितमेव। तत्कारणत्वं च कल्पितत्वमेव। सर्वज्ञत्वादिकं तु दूरत एव अतः तत्कल्पनाधिष्ठानं तु किञ्चिद्रूपमङ्गीकरणीयम्। निरवधिष्ठान-भ्रान्तेरभावात् तदेव पारमार्थिकं रूपमीशस्य। न हि उक्तजीवेश्वरस्वरूपे पारमार्थिके किञ्चिज्ज्ञत्व सर्वज्ञत्वादीनां सम्भवः सोपाधिकधर्मत्वात्। न हि सोपाधिकधर्मस्य निरुपाधिके सम्भवः। न हि जपाकुसुमयुक्ते स्फटिके प्रतीयमानस्य लौहित्यस्य तद्वियुक्ते सम्भवः। तद्वत् अत्रापि अन्तःकरणमायादि अवच्छिन्नयोः तत्सम्भवेऽपि उपाधिकविनर्मुक्तयोः सदसम्भवात्। श्रुतिश्च यत्र वा

In Public domain. Digitization Muthulakshmi Research Academy

अन्यदिव स्यादित्यादिना इव शब्देन द्वैतस्य प्रातीतकत्वं प्रदर्श्य परमार्थतः तदपि निषेधति। यत्र तु अस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यादिना अतः कथं जीवैशभेदसम्भवः। किञ्च भेदस्य पारमार्थिकत्वे य उदरमन्तरं कुरुते अथ तस्य भयं भवतीति भेदज्ञानवतो अनर्थप्रदर्शनं स्यात्। विद्यमानस्य भेदस्य यथावत् ज्ञातत्वेन अनर्थानुपपत्तेः। विपरीतज्ञान एवार्थ इत्यस्य रज्जुसर्पज्ञानिनि दृष्टत्वात्। तथा अभेदस्य परमार्थिकत्वे तज्ज्ञानिनः तस्य तावदेव चिरं यावन्नविमोक्ष्ेथ सपत्स्य इति तस्य पुरुषार्थप्राप्तिश्रवणं न स्यात्। तस्य विपरीतज्ञानत्वात्। नाहमीश्वर इति प्रत्यक्षसिद्धस्य तत्त्वमसीत्यनेन वाक्येन प्रत्यक्षसिद्धचन्द्र-प्रादेशिकत्वस्य **अष्टाशीतिसहस्राणि विस्तीर्ण** इति शब्देनेव बाधसम्भवात्। **स एव नेति नेत्यात्मेत्यादिना** आत्मस्वरूप-व्यतिरिक्तस्य असत्वप्रतिपादनेन किञ्चिज्ज्ञत्वसर्वज्ञत्वादीनाम् अपारमार्थिकत्वस्यापि स्वत एव सिद्धत्वात्। एवं च त्वं शब्दस्य सोपाधिककिञ्चिज्ज्ञत्वादिविशिष्टे शक्तावपि तादृशोपाधिविनिर्मुक्ते लक्षणासम्भवात् तयोश्च लक्षितस्वरूपयोः असिपदेन अभेदबोध-सम्भवात्। पूर्वोक्तासम्भावनामुक्तप्रकारेण विचारेण निवार्यपदार्थ-वाक्यार्थसम्भवानां निश्चिनोति। ननु अनेकैः महर्षिभिरनेकधात्मस्वरूपस्य पुरुषार्थस्वरूपस्य च प्रतिपादितत्वात् त्वदुक्तप्रकार एव कथं ग्राह्य इत्यत आह श्रुतिशिरः

In Public domain. Digitization Muthulakshmi Research Academy

पक्षस्समाश्रीयतामिति। श्रुतिशिर इत्यस्य पूर्वमेवार्थौ वर्णितः तस्य योऽयं पक्षस्तात्पर्यविषयीभूतार्थरूपः समाश्रीयतां सम्यगाश्रीयतां तस्य सम्यगाश्रयणं च तदुक्तार्थस्यैव ग्रहणम्। अयम्भावः श्रुतिस्मृतिविरोधे च श्रुतिरेव बयलीसीति न्यायेन श्रुतेर्बलवत्प्रमाणवत्वेन तदुक्तार्थस्यैव ग्राह्यकत्वात्। महर्षिप्रणीतस्य स्मृतिरूपत्वेन दुर्बलत्वात् तदुक्तार्थस्य अग्राह्यत्वात्। तथा च दुर्बलस्मृत्युक्तं पक्षं परित्यज्य श्रुतिशिरस्सम्मतं मदुक्तार्थमेव ग्रहाणेति। ननु महर्षिप्रणीतमपि युक्तियुक्तत्वात् ग्राह्यमेव। तथा हि आत्मा प्रतिशरीरं भिन्नः सुखदःखवैचित्र्यदर्शनेनात्मैकत्वे तदनुपपत्तेः। आत्मा कर्ता अचेतनस्य कर्तृत्वादर्शनात्। तथा सति तृणादीनामपि कर्तृत्वापत्तेः। अत एव तस्य भोक्तृत्वमन्यस्य भोक्तृत्वेति प्रसङ्गापत्तेः। दुःखाभावः पुरुषार्थः सुखस्य दुःखसम्पृक्तत्वेन परित्याज्यत्वेनापुरुषार्थत्वात्, विषसम्पृक्तमधुवत् इत्यादि युक्तियुक्तमुपादेयं वचनं बालकादपि इति न्यायेन तदा च तदुक्तार्थस्य श्रुत्यपेक्षया दुर्बलत्वेऽपि ग्राह्यत्वमेवेत्यत आह दुस्तर्कात् सुविरम्यतामिति। दुष्टः आभासः श्रुतविरुद्ध इति वा तर्कः युक्तिरूपः यस्य महर्षिप्रणीतस्य तस्मात् दुस्तर्कात्। सुविरम्यतां सुष्ठु विरम्यतां सर्वदा इच्छाभाव एव विरमस्य सुष्टुत्वं बोध्यम् इति। अयं भावः उक्तयुक्तिनिचय आभास एव तथाहि कामसङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एवेति कामादीनां

 In Public domain. Digitization Muthulakshmi Research Academy

मनोधर्मत्वप्रतिपादनेन सुखदःखयोरपि तद्धृत्तिरूपत्वेन तद्धर्मत्वात् तद्वैचित्र्यस्य प्रतिशरीरं मनोभोदादिकत्वेऽपि आत्मभेदानापादकत्वादचेतनस्य शरीरादेरेव कर्तृत्वदर्शनात्। तृणीदीनां च चेतनसन्निधानविशेषाभावेनाकर्तृत्वोपपत्तेः। आत्मसन्निधानविशेषस्यैव कर्तृत्वप्रयोजकत्वात् अकर्तृत्वादेवाभोक्तृत्व वैषयिकसुखस्य दुःखसङ्कलितत्वेऽपि नित्यसुखस्य तदभावान्नित्यसुखस्य विधिज्ञानमानन्दं ब्रह्मेति श्रुतिसिद्धस्य निरसितुमशक्यत्वात् आभासत्वयुक्तयुक्तिनिचयस्य बोध्यम्। श्रुतिविरुद्धं च **द्वितीयाद्वै भयं भवतीति** भेदमात्रनिषेधेनात्मभेदस्य सुतरामनुपपत्तेरात्मनो ब्रह्मभेदप्रतिपादने कर्तृत्वादेः श्रुतिविरुद्धत्वात् **ब्रह्मविदाप्नोति परं** इति ब्रह्माप्तेरेव पुरुषार्थश्रणाच्चेति द्रष्टव्यः। तथा च श्रुतिविरुद्धाभासयुक्तिसङ्कलितं तद्वाक्यमनादेयमेवेति। एवं दुस्तर्कसङ्कलितव्याध्याद्युक्तिविरमोक्त्या त्वयापि दुस्तर्कानुसन्धानं न कार्यमिति द्योतितम्। ननु यदि दुस्तर्काद्विरमः तर्हि किं तर्कत्वाविशेषात् सुतर्केऽपि विरमः कार्य इत्यत इह श्रुतिमतस्तर्कोऽनुसन्धीयतामिति। श्रुतेर्मतः सम्मतः श्रुतितात्पर्यार्थानुगुण इति यावत्। तर्कोऽनुमानमनुसन्धीयतां अनुस्मर्यतामिति। अयं भावः **श्रोतव्यो मन्तव्यो** इति श्रवणानन्तरं मननविधानेन मननस्य युक्त्यनुचिन्तनरूपत्वेन श्रुतार्थदार्ढ्यार्थतया आवश्यकत्वेन श्रुत्या च योऽनुभवादयश्च यथा सम्भाविताः प्रमाणमिति भाष्येण श्रुतिव्यतिरिक्तप्रमाणस्वीकारेण च

In Public domain. Digitization Muthulakshmi Research Academy

तस्यावश्यकत्वेन दुस्तर्कस्य श्रुत्यर्थविरोधित्वेन परिहार्यत्वेऽपि सुतर्कस्त्वया अवश्यमिहानुसन्धेय एवेति। ननु उक्तविचारेण असम्भावनाया निवृत्तत्वेनाहं ब्रह्मास्मीति निश्चये जातेऽपि देहादौ अहमित्यभिमानेन तत्र चात्मनिश्चयस्य रूढत्वेन स्वस्य ब्रह्मत्वनिश्चयस्याभिभवेनाभिभूतस्य कार्यजननासामर्थ्येनोत्पन्नोऽपि ब्रह्मत्वनिश्चयो निष्फलः स्यात्। तथा च तदर्थविचारोऽपि निरर्थक एव स्यादित्यत आह ब्रह्मास्मीति विभाव्यतामिति। अनुदिनमित्यध्याहार्यम्। ब्रह्मनिरस्तनिखिलोपाधिकचैतन्यसुखरूपं सत्तात्मकं तदहमस्मीति विभाव्यतां विशेषेण भावना क्रियतामिति यावत्। भावनाया विशेषस्य सार्वकालिकत्वं बोध्यम्। एवं च सार्वकालं श्रुत्युक्तब्रह्मध्यानेन तद्विषयनिश्चयस्य मूढत्वसम्भवादिति भावः। ननु त्वदुक्तप्रकारेण वाक्यं सार्थकं श्रुतवतस्तदर्थ-विचारेणासम्भावनान्निवृत्तिमतः तदर्थध्यानेन तदर्थनिश्चय दार्ढ्यवतो मम को वा समानमित्यभिमानिनमन्तेवासिनं प्रतिज्ञानित्वादीनां निर्धर्मके आत्मन्यसम्भावत् अन्तःकरणनिष्ठत्वेन तव तद्धर्माभिमानेनाज्ञत्वमेव प्रसज्येत। तथा चाज्ञाननिवृत्यर्थविचारादि-प्रयासो निष्फलः स्यात्। अतः त्वया तत्यागः कार्य इत्याह अहरहः गर्वः परित्यज्यतामिति। गर्वः ज्ञानित्वाभिमानिनः अहरहः प्रतिदिनं जयमानोऽपीति शेषः। तथा च अभिमाननिवृत्तावज्ञानाद्यप्रसक्तेः विचारादिस्सार्थक एव स्यादिति भावः। ननु पूर्वोक्तपरिकुण्ठिभूत-

 In Public domain. Digitization Muthulakshmi Research Academy

देहात्मज्ञाने सति त्वदुक्तब्रह्मध्यानेन कथं निश्चयो दृढो भवेदित्याशङ्क्य तत्यागपूर्वकमेव त्वया ध्यानं कार्यमन्यथा ध्यानत्वाव्याहतेरित्यभिप्रेत्याह देहेऽहं मतिरुज्झतामिति। देहे स्थूले सूक्ष्मे चाहं मतिरहमिति मतिरुज्झतां परित्यज्यतामिति। तथा च तत्यागपूर्वमेव आत्मध्यानेन देहात्मज्ञानप्रत्यवादात्मज्ञानमेव दृढं भवतीति भावः। ननु आत्मस्वरूपं समज्ञातत्वेन येह्यात्मस्वरूप-विपरीतवादिनस्ते मया चेतव्या इत्युक्तवन्तं शिष्यं प्रति तैस्साकं वादस्यापि जयपराजयभूतस्य जयपराजयजन्यसुखदुःखद्वारा जेतास्मि मत्समानः को विद्यायां पराजितोऽस्मि तुच्छा मदीया विद्या इतःपरं दृढमभ्यस्यामीत्यभिमानापादकत्वात् सोऽपि त्याज्य एवेत्याह बुधजनैर्वादः परित्यज्यतामिति। वदतीति वादः विवादः कलहः इति यावत्। तथा च तत्यागे न तव अभिमानप्रसक्तिरिति भावः।।3।।

ननु अस्तु उक्तरीत्या विचारसाचिव्यं तथापि कथमात्मविचारे मनोनैश्चल्यं सिध्येत् क्षुद्-व्याधिभ्यां परिपीडितस्य पुरुषस्य तदाकृष्टमानसत्वात् अन्याकृष्टमनसोऽन्यत्र मनोनैश्चल्या-योगादित्यत आह क्षुद् व्याधिश्च चिकित्स्यतामिति।

क्षुद्-व्याधिश्च चिकित्स्यतामनुदिनं भिक्षौषधं भुज्यतां
स्वाद्वन्नं न तु यत्यतां विधिवशात् प्राप्तेन सन्तुष्यताम्।

In Public domain. Digitization Muthulakshmi Research Academy

औदासीन्यमभीस्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यतां

शीतोष्णादिविषह्यतां न तु वृथा वाक्यं समुच्चार्यताम्।।4।।

क्षुत् व्याधिश्चेति भेदः चकारस्वारस्याच्छिकित्स्यतामित्येतदावृत्य योज्यं क्षुच्च चिकित्स्यतां व्याधिश्च चिकित्स्यतामिति। ननु ताभ्यां तौ निवार्यौ निवारितावपि पुनरुत्पन्नौ कथं निवारितौ भवत इत्याशङ्क्याह अनुदिनं भिक्षौषधं भुज्यतामिति। अनुदिनं प्रतिदिनं व्याधिनिवृत्तौ तन्निवृत्तिपर्यन्तमिति शेषः। क्षुन्निवृत्तौ तु यावज्जीवं बोध्यं भिक्षा च औषधं चेति द्वन्द्वैकवद्भावः भिक्षा च।।

मधूकरमसङ्क्लृप्तं प्राक्प्रणीतमयाचितम्।

तात्कालिकं चोपपन्नं भैक्षं पञ्चविधं स्मृतम्।।

इति स्मृत्युक्तपञ्चविधापि ग्राह्या सा च यावत् क्षुन्निवृत्तिभोक्तव्यैव। अन्यथा तदनिवृत्यापुर्वोक्तमनोनैश्चल्यासिद्धेः तदवस्थत्वान्नचाष्टौ ग्रासा इति स्मृतिविरोधः तस्य विचारानधिकारिविषयत्वात् औषधं भैषज्यं तन्निवृत्तिस्मृतिरपि विचारानधिकारिविषयैव। न तु विचाराधिकारिविषया तदधिकारिणः तन्निषेधे रोगानिवृत्या-विचाराप्रसक्तौ परुषार्थप्रच्युतिप्रसङ्गात्। तथा च अनुदिनं भिक्षौषधभोजनाभ्यां क्षुद्व्याधिनिवृत्तिसम्भवात्। विचारे मनोनैश्चल्यं सिद्ध्येदिति भावः। यद्वा ननु आत्मविचारप्रतिबन्धककर्मादित्यागे भिक्षाशनस्यापि त्याग एव तस्यापि तत्र प्रतिबन्धकत्वात् इत्याशङ्क्य आह क्षुद्व्याधिश्च चिकित्स्यतामिति। व्याधिरिव क्षुद्व्याधिर्यथा व्याधिः

 In Public domain. Digitization Muthulakshmi Research Academy

शरीरपातपर्यन्तः एवं क्षुदिति क्षुद्व्याधिरित्युच्यते। चकारश्चावधारणार्थश्चिकित्स्यतामित्यत्र सम्बन्धः। चिकित्सया निवार्यमेवेत्यर्थः। चिकित्सा च क्षुन्निवर्तकभक्षणमेवेत्यर्थः। अयं भावः भिक्षाशनाभावे शरीरपातप्रसङ्गेन विचारस्य मूलतो हानिप्रसङ्गेन तस्यावश्यकर्तव्यत्वात् विधिपूर्वककर्मत्यागे च तादृशदोषाभावादिति केन न निवार्यत इत्यत आह अनुदिनं भिक्षौषधं भुज्यतामति। औषधमिव भिक्षेति भिक्षौषधं यथा औषधं रुचिमनवेक्ष्य तिक्तं कटु वा भुज्यते एवं भिक्षा च रुचिमनपेक्ष्यैव भुज्यतामिति यावत्। तथा च भिक्षाशने नैव तन्निवृत्तिर्भवतीति भावः। ननु अस्तु भिक्षाशनेन तन्निवृत्तिः तथापि औषधवत्तस्याशनमित्युक्तम्। तथापि औषधं कटु तिक्तं वा यद्रोगहारी तदेव भोक्तव्यमितरप्रकारस्य तदनिवर्तकत्वात्। प्रत्युत व्याध्याद्यभिवृद्धिकरत्वाच्च भिक्षा तु रुचिभूतापि तन्निवर्तका। तथा च तन्निवृत्तिसम्भवे किमर्थमौषधवद्भिक्षा भोज्येति स्वादुभूतैव सम्पाद्येत्यत आह स्वाद्वन्नं न तु यत्यतामिति। तु शब्दः शङ्काव्यावृत्यर्थकः । स्वादु रुचिभूतमन्नं भक्ष्यभोज्यचोष्यलेह्यरूपं चतुर्विधमुद्दिश्येति शेषः । न यत्यतां यत्नो न कार्यः तद्विषयकयत्ने तस्य सुलभतो लभ्यत्वेन कथमिदं साध्यमिति विचारे सत्यात्मविचारेन नैश्चल्यं सिध्यतीति भावः। ननु यत्नाभावेन किञ्चिदपि सिध्येत् सर्वस्यापि यत्नसाध्यत्वादित्यत आह प्राप्तेन सन्तुष्यतामिति। विधेः कर्मणः जन्मान्तरकृतस्य शरीरारम्भकस्य

In Public domain. Digitization Muthulakshmi Research Academy

कृतस्य दुष्कृतस्य वा वशात् परिपाकवशात् प्राप्तेनान्नादिना सन्तुष्यतां सम्यक् तोषस्य लब्धस्य समीचीनत्वेन असमीचीनत्वेन वा समताबुद्धिरेव। अयम्भावः शरीराम्भकस्य कर्मणो यावच्छरीर-स्थायित्वेन तद्वशादेव लाभसम्भवे यत्नो निष्फलः। न च कर्मबलात् यत्किञ्चित् दुष्टप्रसक्तौ तन्निवारणार्थं यत्न आवश्यक इति वाच्यम्। कर्मबलेन प्राप्यमाणस्य यत्नेन निवारयितुमशक्यत्वात् तदुक्तम् यदभावि न तद्भावि चेन्न तदन्यथेति। तथा चाभाविनो यत्नेनापि लाभासम्भवाद्भाविनश्च यत्नेन निवारयितुमशक्यत्वाच्च यत्नो निष्फल इति। यद्वा ननु अस्तु कर्मफलादेवमन्नादिप्राप्ते यत्नश्च मास्तु तथापि कर्मबलेन प्राप्यमाणादिषु स्वाद्वन्नादिषु प्रीतिः स्यादित्याशङ्क्य तथा सति तद्भोगासक्तमनसः आत्मविचारे नैश्चल्यं न विध्येदतः प्रीतिं मुक्त्वा क्षुन्निवृत्तिमात्रं कार्यमित्याह विधिवशात् प्राप्तेन सन्तुष्यतामिति। विधेः सुकृतदुष्कृतधर्मणो वशात् प्राप्ते स्वाद्वन्नादौ न सन्तुष्यतामिति। तथा च न नैश्चल्याभावप्रसक्तिरिति भावः । एवं व्याख्याने च सन्तोषशब्दस्य मुख्यार्थो भवतीति ध्येयम्। ननु प्रियलाभालाभयोः सुखदुःखदर्शनात् तथा अप्रियलाभालाभयोः सुखदुःखादर्शनाच्च कथमुभयत्र मम समता स्यादिति आशङ्क्य आह औदासीन्यमभीप्स्यतामिति। उदासीनस्य भावः औदासीन्यं सुखदुःखहेतौ उभे च हर्षविषादराहित्यम् अभीप्स्यताम् आप्तुमिष्यताम्। तदनन्तरं अभ्यस्यतां चेत्यर्थः। तथा च अभ्यास-

लाभे उभयत्र लाभालाभयोः समता भवतीति भावः। ननु मदीयसुखदुःखलाभालाभनिवृत्यर्थं मम प्रवृत्यभावेऽपि धीरजन-दर्शनेन तदीयदैन्यप्रवृत्यर्थं कृपया प्रवृत्तिसम्भवेन तथा कस्यचित्किञ्चिद्धातुकं किञ्चिद् दृष्ट्वा तद्धननिवृत्यर्थं नैष्ठुर्येन प्रवृत्तिसम्भवेन ताभ्यां व्यासक्तचित्तस्य मम तु आत्मविचारे नैश्चल्यं सिध्येदित्याशङ्क्य तेन कार्यै याभ्यां तवाप्याक्षेपस्स्यादित्यत आह जनकृपानैष्ठुर्यमुत्सृज्यतामिति। जनेषु कृपा च नैष्ठुर्यं चेति द्वन्द्वैकवद्भावः उत्सृज्यतां परित्यज्यतामिति यावत्। एवञ्च तयोः त्यागे निश्चलता भवेदिति भावः। ननु अस्तु दैवादागतान्नपानादिलाभालाभनिमित्तहर्षविषादाभावः शीतोष्णादि-जन्यविषादो दुर्वार इत्याशङ्क्याह शीतोष्णादि विषह्यतामिति। शीतं च उष्णं च शीतोष्णे शीतं हिमादि उष्णं सौरादिकं तेजिते आदी यस्य मानावमानादेः तत् तथोक्तं मानं पूजा अवमानं अपूजा तच्छीतोष्णादि विषह्यतां विशेषेण सह्यतां सहने विशेषश्च तज्जन्यदुःखे प्रिय इव स्थितिः तत् सहनं च दैववशसम्पन्न-शीतोष्णादिसहनमेव। न तु स्वयमेव गत्वा शीते उष्णे वा स्थित्वा तत् सहनम्। तथा सति तन्निमित्तशरीरराहित्यापत्या आत्मविचारानुकूलशरीराभावे नात्मज्ञानाभावात् पुरुषार्थो न सिध्येत्। प्रत्युत आत्महननदोषेण अनर्थश्च प्राप्नुयादेवं च दैववशसम्पन्नशीतोष्णादेर्यत्नेनाप्यनिवार्यतया तन्निमित्तविषादेन

In Public domain. Digitization Muthulakshmi Research Academy

क्लेशमात्र लाभात्तत्रापि विषादो न कार्य इति भावः। ननु जयपराजयहेतुभूतवादाभावेऽपि लौकिकवार्तापि स्यादित्याशङ्क्य लौकिकवार्तादिप्रसङ्गे तदाकृष्टमनसस्तवोत्पन्ने अपि आत्मनिश्चये दार्ढ्यो न सिध्येत्। उत्पन्नमात्रस्य चाकार्यकरत्वादतस्त्वया सोऽपि त्याज्य इत्याह न तु वृथा वाक्यं समुच्चार्यतामिति। वृथा व्यर्थं निष्फलं वाक्यं पदसमूहः तु शब्दाच्चकारार्थात् वर्णसमूहात्मकं पदमपि गृह्यते उभयमपि समुच्चार्यताम्। अत्र पदवाक्ययोः निष्फलत्वपुरुषार्थानुपयोगित्वं न तु निष्फलत्वमात्रम्। ततो मनः प्रीतिरूपफलत्वेन निष्फलत्वाभावादेवञ्च व्यर्थवाक्यासमुच्चारणोक्त्या न केवलं ज्ञानं दार्ढ्यमात्रं सिध्येत्। अपि तु तादृशवार्तया औचित्यानौचित्यप्रयुक्तहर्षविषादाभावोऽपि सिध्येदिति सूचितमिति ध्येयम्।4।।

व्यर्थव्याक्यासमुच्चारणं च मम कदा भवेदित्यत आह एकां ते सुखमास्यतामिति।

एकान्ते सुखमास्यतां परतरे चेतस्समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम्।
प्राक्कर्मापि विलाप्यतां चितिबलान्नाप्युत्तरैःश्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम्।।5।।

एकः अन्तः पर्यवसानभूतः यस्मिन् तस्मिन् स्वव्यतिरिक्तपुरुषरहिते देशे सुखं निर्व्याक्षिप्तं यथा भवति तथा

आस्यतां गमिष्यतामिति। ततश्च वृथा वाक्योच्चारणं न भवतीति भावः। ननु एकान्तवासेऽपि मनसो विषयलोलुपतया विषयगमने सति ज्ञानदार्ढ्यं पूर्ववदेव न सिध्यतीत्याशङ्क्य ब्रह्मस्मीति विभाव्यतामित्यत्रैव प्रयत्नपुरस्सरमितरविषयकध्याननिरासेन ब्रह्मविषयकध्यानाभ्यासस्योक्तत्वात् तन्न विस्मर्तव्यमित्यभिप्रेत्याह **परतरे चेतस्समाधीयतामिति**। परतरे उत्कृष्टतरे ब्रह्मणि चेतः मनस्समाधीयतां सम्यगाधीयतां तद्विषयकध्यानमेव सदा धार्यमित्यर्थः। एवं च बालस्य मातरमेव स्मरत इतराभ्यासेन मातृविस्मरणे नेतरविषयचित्तवदत्रापि विषयासक्तमनसोऽपि ब्रह्मविषयकध्यानेन इतर विस्मरणसम्भवात् नोक्तदोषावकाश इति भावः। ननु ब्रह्मविषयज्ञानाभावे तत्स्वरूपापरिज्ञानात्तस्य ध्यानमपि न सिध्येदिति आशङ्क्य आह **पूर्णात्मासु समीक्ष्यतामिति**। पूर्णः व्यापकः स चासौ आत्मा चेति तथोक्तः सुसमीक्ष्यतां सुष्ठु समीक्ष्यतां सुष्ठु समीक्षणं यथावत् ज्ञानमेव तथा चात्मनो यथावत् ज्ञातत्वेन ध्यानं सम्भवतीति भावः। ननु आत्मनो व्यापकत्वं नाम सजातीयविजातीयस्वगतभेद राहित्यमभिमतम्, तदयुक्तम्। विजातीयस्य जगतः सत्वेन तद्भेदराहित्ययोगात् सतः स्वरूपतो भेदे प्रमाणाभावाच्चेत्याशङ्क्याह जगदिदं तद्बाधितं दृश्यतामिति। इदं परिदृश्यमानं जायते पुनर्लयं गच्छतीति जगत् स्थावरजङ्गमात्मकं सर्वं सद्बाधितं तेन परमात्मविषये क्षणेन बाधितं नास्ति। तयापादितं

In Public domain. Digitization Muthulakshmi Research Academy

दृश्यतां प्रेक्ष्यतां तां प्रेक्ष्यतां जगतस्दज्ञानविजृम्भितत्वेन तज्ज्ञानेन बाधसम्भावाच्चुक्त्यज्ञानकल्पितस्य रजतस्य शुक्तिज्ञानेनेव। एवञ्च विजातीयस्य जगतः आत्मज्ञानबाधितत्वसम्भवेन सदेव सौम्येदमग्र आसीदिति श्रुत्या अस्य तद्व्यतिरिक्तसर्वनिषेधेन च सदसदिति प्रतीत्या सत एकत्वेन चोक्तं व्यापकत्वं सुदृढमिति भावः। ननु स्वात्मविचारात्संसारनिवर्तकज्ञानं तथापि न विदेहकैवल्यसिद्धिः। शरीरारम्भकानेककर्मणां सत्वान्न चेदानीं कर्मसन्यासादेव कर्माप्रसक्तेः सशरीरादिप्रसङ्ग इति वाच्यम्। इदानीं तव कर्माभावेऽपि पूर्वजन्मकृतानेककर्मसत्वात् तेषु एव जन्मसु फलदानमित्यत्र नियमाभावादन्यथा अस्मिन् जन्मनि कृतयज्ञादेरस्मिन्नेव जन्मनि फलप्रसङ्गात्। तथा च पूर्वजन्मकृत-कर्मणां फलमदत्वानाशे अनियतफलत्वापत्या ते इष्टप्रवृत्तिप्रसङ्गेन तेषां नियतफलत्वमवश्यवाच्यम्। न चाशरीरादिकं विना तत्फलं भवतीति शरीरादिकमपि भवत्येवेतीत्यह **प्राक्कर्मापि विलाप्यतामिति**।. चितिबलादिति काकाक्षिन्यायेन पूर्वत्रापरत्र च योज्यम्। चितिर्ज्ञानम् आत्मविषयं तस्य बलात्प्राक् पूर्वजन्मसु कृतं कर्मसुकृतं च विलाप्यतां प्रदह्यतामिति। अयं भावः न हि बीजं नियतांकुरमित्येतावता दग्धमप्यङ्कुरभावमापद्यते। एकं कर्मापि ज्ञानाग्निदग्धं कथं फलाय भवेत्। न चैतावतानि यत्फलत्वं तर्हि बीजादावपि तुल्यत्वेन तत्राङ्कुरार्थिनः प्रवृत्तिप्रसङ्गात्। श्रुतिश्च

कर्मणो ज्ञानाग्निदग्धत्वं दर्शयति। तद्यथेषीकातूलमग्नौ प्रोतं प्रदायेतैवं हास्य सर्वे पाप्मानः प्रदूयतम् इति। स्मृतिश्च **ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा** इति। तथा च नियतफलत्वेपि न शरीराद्यावश्यकत्वेति। ननु मास्तु नामप्राकृत-कर्मणा शरीरादिज्ञानान्तरकृतेन कर्मणा तद्भवत्येव तेषां ज्ञानसमकालत्वेनाविरोधित्वेन ज्ञानेन दाहयोगादित्याशंक्याह चितिबलान्नाप्युत्तरैश्श्लिष्यतामिति। चितिबलादितिगतं व्याख्यानम् उत्तरैर्ज्ञानानन्तरं कृतैरपि कर्मभिर्न श्लिष्यतां न श्लेषोव्याप्यतामिति। अयं भावः कर्तुः फलं भवति। न चात्मा कर्ता ईश्वराभिन्नस्य तस्य कर्तृत्वानुपपत्तेः। न च तर्हि ज्ञानात्पूर्वमप्यात्मनः फलभागता न स्यात्तथाप्यकर्तृत्वस्य तुल्यत्वादिति वाच्यम्। तर्हि तदानीं स्वतो कर्त्रेपि कर्तृत्वाभिमानेन फलभागतोपपत्तावपि ज्ञाननन्तरं तदभिमानाभावेन फलभागत्वाभावात्। एवं च आत्मनः कथं कर्मफलत्वेन सम्श्लेषः। न चैवं कर्मणां वैफल्यमिति वाच्यम्। तस्य **पुत्रादायमुपयन्ति सुहृदस्साधुकृत्यान् द्विषन्तः पापकृत्यानि** इति श्रुत्यैव कर्मफलविनियोगस्य दर्शितत्वाच्छ्रुत्यैव ज्ञानिनः कर्मफलतासम्श्लेषस्य कण्ठरवेण प्रतिवादितत्वात्। तद्यथा पुष्कलपलाश अपो न तिष्ठान्त एवमेवंविधपापकर्मावश्लिष्यत इति। तथा च कर्मणो निष्फलत्वाभावेऽपि तत्फलेनात्मनः संश्लेषाभावान्न तेनापि शरीरादिप्रसक्तिरिति। ननु तर्हि ज्ञानसमकाल एव

 In Public domain. Digitization Muthulakshmi Research Academy

विदेहकैवल्यापत्तिः। ज्ञानपूर्वकृतकर्मणां विनाशेन शरीरारम्भकस्यापि विनाशात्स्वारम्भककर्माभावेऽपि तस्य स्थित्यनुपपत्तेः। न चारब्धफलस्य ज्ञानेन विनाशो न सम्भवतीति वाच्यम्। तथैव नियामकाभावादित्याशङ्क्याह **प्रारब्धं त्विह भुज्यतामिति**। इह अस्मिन् शरीरे हेतुभूतमिति शेषः। अत एव प्रारब्धं प्रकर्षेणारब्धम् आरब्धमिति यावत्। कर्म भुज्यतां तत्फलं सुखं दुखं वा अनुभूयतामिति यावत्। अयं भावः पूर्वकृतकर्मणो अनारब्धफलस्य ज्ञानेन नाशेऽपि आरब्धफलस्य तेन नाशो न हि सम्भवत्येव। यथा धानुष्कस्य तूणीरनिक्षिप्तबाणग्रहणे पुनस्तत्रैव निक्षेपे तथा धनुष्यारोपे पुनः धनुषो ग्रहणे च सामर्थ्यसद्भावेऽपि मुक्तेषु निवर्तने सामर्थ्याभावः। तद्वत्सचेषु यथा यावद्वेगङ्गत्वैव पतति तद्वत्कर्मापि यावत्स्वफलं तिष्ठति तदनन्तरं नश्यति। न च वेगतो गच्छत इषोः यावद्वेगमगत्वैव दण्डादिप्रतिघातेन अन्तरापतन-दर्शनात् तद्वदेव प्रारब्धं कर्मापि ज्ञानप्रतिहतं सद्यावत्फल-मस्थित्वानश्यतीति वाच्यम्। दण्डप्रतिघातस्य इषुपतनहेतुत्वस्य प्रत्यक्षसिद्धत्वेनेषुवेगविरोधितत्वेऽपि ज्ञानस्य तज्जन्यत्वेन तदविरोधित्वान्न हि कार्यकारणविरोधि कुत्रचिद्दृष्टम्। न हि भेरीशब्दस्थिते स्थले शब्दान्तरोत्पत्तिरस्ति येन प्रथमादिशब्दान् प्रति द्वितीयादिशब्दानां नाशकत्वं स्यात्। न च द्वितीयादि-शब्दानुत्पत्तौ शब्दस्य श्रोत्रेण ग्रहणं न स्यात्। शब्दस्य

भेरिदेशस्थत्वात्। श्रोत्रस्य पुरुषदेशस्थत्वात्। तदसम्बन्धस्य श्रोत्रस्य तद्ग्राहकत्वादिति वाच्यम्। अस्मन्मते श्रोत्रस्य कर्णशुष्कल्यवच्छिन्नभूतदेशातिरिक्तत्वेन तस्य शब्ददेशे गमनसम्भवान्न चैवमपि मथनद्वारा सोत्पादककाष्ठं प्रति वह्नेर्दाहकत्वं दृष्टं तन्नस्यादिति वाच्यम्। काष्ठस्य मथनद्वारा बह्न्यभिभवविवृत्तिमात्रोपयुक्ततया तदकरणत्वात्। अत्र च बहुवक्तव्यमस्ति तथापि विस्तरभयादुपरम्यते। श्रुतिश्च ज्ञानानन्तरमपि प्रारब्धकर्मफलस्यावस्थानं दर्शयति। तन्निवृत्यनन्तरं विदेहकैवल्यं दर्शयति। तस्य तावदेव चिरं यावन्न विमोक्षेथ सम्पत्स्य इति। ततो न ज्ञानानन्तरमेव विदेहकैवल्यावकाश इति। ननु अस्तु कर्मनिवृत्यसम्पादकं ज्ञानं तथापि तस्मात् ज्ञानान्नत्त्वदभिमतमुक्तिसिद्धिः। तथा हि नित्यनिरतिशयसुखावस्थितिः किं मुक्तिः किं वा अविद्यानिवृत्तिः। नाद्यः तस्य ज्ञानसाध्यत्वादन्यथा नित्यत्वभङ्गापत्तेः। ब्रह्मण एव नित्यनिरतिशयसुखरूपत्वेन तस्य च त्वदभिमतात्मत्वेन स्वरूपत्वात्स्वरूपस्य च स्वतस्सिद्धत्वेन तल्लाभार्थं ज्ञानाद्ययोगाच्च। न द्वितीयः। अविद्यानिवृत्या स द्वितीयत्वेनाद्वितीयत्व सिद्धान्तविरोधात्। न हि भावाभावयोरेकत्वं सम्भवतीत्यत आह **अथ परब्रह्मात्मना स्थीयतामिति।** अथ प्रारब्धकर्मक्षयानन्तरं परब्रह्मात्मना परब्रह्मस्वरूपेणैव स्थीयतामिति। अयं भावः

 In Public domain. Digitization Muthulakshmi Research Academy

मुक्तिर्द्विविधा अनर्थनिवृत्तिरानन्दावाप्तिश्चेति। अत्रानर्थनिवृत्तिः ज्ञानादुत्पन्नायाः विद्यायाः अविद्याविरोधित्वेन तन्निवर्तनक्षमत्वेन स्वहेतुभूताविद्यानिवृत्तौ अनर्थस्य कर्तृत्वादेर्निवृत्युपपत्तेः। न च तया अनर्थनिवृत्त्या सद्वितीयत्वापत्तिरनर्थस्य कल्पितत्वेन तन्निवृत्तेरपि सुतरां कल्पितत्वात् काल्पनिकस्य परमार्थवस्तुना साकं द्वितीयत्वानापादकत्वान्नहि मैत्रीपुत्रेण वन्ध्यापुत्रः कल्पितो द्वितीयतामवपद्यते। वस्तुतस्तु कल्पितवस्त्वभावस्य अधिष्ठानातिरिक्तत्वाभावेन सकार्यायाः अविद्यायाः कल्पितत्वेन तन्निवृत्तेरपि तदधिष्ठानातिरिक्तत्वाभावत्। न च तन्निवृत्तेरधिष्ठानानतिरेके अधिष्ठानस्य नित्यत्वेन ज्ञानजन्यत्वं न स्यादिति वाच्यम्। अधिष्ठानस्य स्वरूपाकारेण जन्यत्वेऽपि तन्निवृत्तित्वाकारेण तज्जन्यत्वोपपत्तेर्नाशकाभावाच्च। नाशाभावान्न ह्यज्ञानानन्तरं कस्यचिन्नाशकस्य सम्भवः। स्वाकारिणेव नित्यत्वस्य श्रुतिसिद्धत्वात्। न चाभावस्य भावरूपमनुपपन्नमिति वाच्यम्। घटाभावाभावस्य घटत्वदर्शनेन तादृशनियमाभावात्तथा च ज्ञानादनर्थनिवृत्तिरिति सुष्ठूक्तम्। आनन्दावाप्तैश्च औपचारिकं पूर्वमप्राप्यस्यानन्दस्य इदानीं प्राप्त्यभावात्। न चानन्दस्य स्वतस्सिद्धरूपत्वेन प्रारब्धस्य क्षयानन्तरं ब्रह्मानन्दात्मना स्थिति प्रतिपादकमूलकारवाक्यविरोध इति वाच्यम्। स्वत एव पूर्वं ब्रह्मात्मना स्थितस्यापि जीवस्याविद्यामहिम्ना भिन्नवत् स्थितस्य

 In Public domain. Digitization Muthulakshmi Research Academy

सकार्यतन्निवृत्तावथ परब्रह्मात्मना स्थीयतामिति वक्तुं शक्यत एव। पूर्वं तदवस्थाया एव शुक्तेस्स्वाज्ञानमहिम्ना अतथाभूतवत् स्थितायाः तन्निवृत्तौ स्वरूपापत्तिरिवेति न कोऽपि दोष इति सङ्क्षेपः।

अज्ञातं ब्रह्मतत्वं ये ज्ञातुमिच्छन्ति ते नराः।
समाश्रयं तु सततं किरणावलिमादरात्।।

मदीयकृतिमध्ये यो भूषणं दूषणं जनः।
विचार्यैववदेत्तस्मै महते निधये नमः।।

इति श्रीपरमहंसपरिव्राजकाचार्य-अद्वैतविद्याचार्यश्रीमत्-सच्चिदानन्दयोगीन्द्रचरणकमलयुगभृङ्गायमानमानसबालकृष्णानन्द सरस्वतीविरचिता, अद्वैतपञ्चरत्नव्याख्या किरणावली सम्पूर्णा।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

सव्याख्यानात्मबोधः प्रारम्भः

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम्।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते।।1।।

व्या - तत्रभवान् शङ्कराचार्यः उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनामनुग्रहार्थं सर्ववेदान्तसिद्धान्त सङ्ग्रथितमात्म-बोधाख्यं प्रकरणं दिदर्शयिष्यन् प्रतिपादयितुं प्रतिजानीते **तपोभिरिति**। कृछ्रचान्द्रायणनित्यनैमित्तिकाद्यनुष्ठानरूपैः तपोभिः क्षीणानि नष्ठानि पापानि रागाद्यन्तःकरणदोषाः येषां तेषाम्। नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयं इति वचनात्। अत एव शान्तानां अक्षोभिताशयानां वीतरागिणामिहामुत्रार्थफलभोगासक्तशून्यानां मुमुक्षूणां संसारग्रन्थिभेदने कृतप्रयत्नानां यथोक्तसाधनचतुष्टय-सम्पन्नानाम् अधिकारिणां मया आत्मबोधो विधीयते विधिमुखेन आवश्यकतया प्रतिपाद्यत इत्यर्थः।1।।

बोधो हि साधनेभ्यो हि साक्षान्मोक्षैकसाधनम्।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति।।2।।

व्या - ननु तपोमन्त्रकर्मयोगाद्यनेकसाधनेषु सत्सु मोक्षप्रतिबोध एव साधनं किमिति प्राधान्यं नोच्यत इत्यत्राह बोध

 In Public domain. Digitization Muthulakshmi Research Academy

इति। तपोमन्त्रकर्मयोगाद्यनेकसाधनानि परम्परया क्रमेण ज्ञानद्वारा मोक्षं साधयति। ज्ञानन्तु जन्ममात्रादेवाज्ञानं निश्शेषतो नाशयित्वा मुमुक्षुं स्वाराज्ये अभिषेचयति। अतोऽन्यसाधनेभ्यो ज्ञानस्य प्राधान्यमुक्तं तदेव दृष्टान्तेन दृढयति। यथा लोके पचनक्रियायां काष्ठजलादिसाधनेषु सत्स्वपि वह्निं विना पाको न सिध्यति। तद्वत् सर्वसाधनेषु सत्स्वपि ज्ञानं विना मोक्षो न सिध्यतीत्यर्थः।2।।

अविरोधितया कर्म नाविद्यां विनिवर्तयेत्।
विद्याविद्यां निहन्त्यैव तेजस्तिमिरसङ्घवत्।।3।।

व्या - ननु कर्मणां विचित्रशक्तित्वात् कर्मैवाज्ञानं नाशयिष्यतीति किमात्माबोधनेत्याशङ्क्य कर्मज्ञानयोः विरोधाभावान्नेवमित्याह **अविरोधतयेति**। कर्मणः अविद्याविरोधाभावात् अज्ञानं नाशयितुं नोत्सहते विद्या तु प्रकाशरूपत्वात्तिमिरसङ्घवत् अन्धतमसपुञ्जं तेज इवाविद्यां नाशयितुं समर्थमित्यर्थः।।3।।

परिच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः।
स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव।।4।।

व्या - ननु प्रतिशरीरमात्मा परिच्छिन्न एवोपलभ्यते कथं कैवल्यमित्यत्राह **परिच्छन्न** इति। परिपूर्णस्याद्वितीयस्यात्मन अज्ञानपरिकल्पितनानाविध-शरीराद्याः सकृतमेव परिच्छिन्नत्वं न तु

In Public domain. Digitization Muthulakshmi Research Academy

तत्त्वदृष्ट्या। अतोऽविवेकहानादात्मा केवल एव प्रकाशते मेघापायेंऽशुमानिव भानुरिवेत्यर्थः।।4।।

अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम्।
कृत्वाज्ञानं स्वयं नश्येज्जलं कतकरेणुवत्।।5।।

व्या - कथमात्मनोऽद्वैतसिद्धिर्ज्ञानस्य वृत्तिज्ञानस्य सत्वादित्यत्राह **अज्ञानकलुषमिति**। अज्ञानकार्यभूतैरहमादिभिः कलुषं कर्तृत्वभोक्तृत्वाद्यभि-मानिनं जीवं ज्ञानिनं कर्तुचिरकालाभ्यासात्। स्वयं ज्ञानद्वारा तत्कार्याद्यन्तःकरणादिकं विशेषतो नाशयित्वा स्वयमपि नश्यतीति अज्ञानकार्यत्वात् बुद्धेः तत्प्रतिबिम्बितज्ञानस्वात्माभासत्वात्। तदानीमद्वय एवात्मा प्रकाशते। यथा कतकरेणुः अविलं जलं निर्मलं कृत्वा स्वयमपि नश्यति तद्वदित्यर्थः।5।।

संसारस्वप्नतुल्यो हि रागद्वेषादिसङ्कुलः।
स्वकाले सत्यवद्भाति प्रबुद्धेऽसत्यवद्भवेत्।।6।।

व्या - ननु अपरोक्षतया अनुभूयमानस्य संसारस्य कथमत्यन्तासत्वप्रत्यक्षविरोधादित्याशङ्क्य स्वप्नदृष्टान्ते न तस्य मिथ्यात्वं साधयति **संसार** इति। रागद्वेषादिसंकुलो यः संसारः स्वकाले स्वप्नकारणभूते अज्ञाने स्थिते सति तावन्मिथ्याभूतोऽपि संसारः सत्य इव भाति। वेदान्तवाक्यश्रवणादात्मज्ञानोत्पत्या

असत्य एव भवेत्। तत्र दृष्टान्तस्स्वप्नतुल्य इति। स्वप्नेऽपि यावन्निद्रा अनुभूयते तावन्मिथ्याभूतोऽपि सत्य इव प्रबोधे निद्रानाशे मिथ्या भवति तद्वदित्यर्थः ।6।।

तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा।
यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमव्ययम्।।7।।

व्या - जगतः मिथ्यात्वमेव दृष्टान्तान्तरेण दृढयति **तावत् सत्यमिति**। यथा नीलपृष्ठत्रिकोणत्वादिविशेषज्ञानं नोत्पद्यते तावद्रजतज्ञानं सत्यमिव अनुभूयते। यथा सर्वाधिष्ठानभूतं सच्चिदानन्दाद्वयं ब्रह्म यावन्नज्ज्ञायते स्वस्वरूपतया साक्षान्नानुभूयते। तावज्जगदाकारेण परिणतः संसारः सत्य इव भ्रान्त्या दृश्यत इत्यर्थः।

सच्चिदात्मन्यनुस्यूते सत्ये विष्णौ प्रकल्पिताः।
व्यक्तयो विविधास्सर्वा हाटके कटकादिवत्।।8।।

व्या - सर्वदृश्यं प्रपञ्चजातं ब्रह्मण्येव मायया परिकल्पितमिति प्रतिपादयति **सच्चिदिति**। सत्यज्ञानानन्दात्मनि नित्ये सर्वानुस्यूते विष्णौ व्यापके ब्रह्मणि सर्वाः व्यक्तयः देवतिर्यगादयः स्थावरादयः विविधा अपि व्यक्तयः सर्वोपादानभूते परमेश्वरे हेम्नि कटकमकुटादय इव कल्पिता एव न ब्रह्मणो भिन्ना इत्यर्थः।।8।।

In Public domain. Digitization Muthulakshmi Research Academy

यथाकाशो हृषीकेषो नानोपाधिगतो विभुः।

तद्भेदाद्भिन्नवद्भाति तन्नाशे केवलो भवेत्।।9।।

व्या - उक्तमर्थमाकाशदृष्टान्तेन दृढयति **यथेति**। हृषीकेशः मनःप्रभृति-सर्वेन्द्रियप्रवर्तकः नियामको हि विभुः सर्वगतः परमेश्वरस्य अज्ञानपरिकल्पितनानाविधोपाधिषु प्रतिबिम्बितः सन् स्वयमभिन्नोऽपि तद्भेदान्नाथेव भाति। तन्नाशे सति ब्रह्मात्मैक्यज्ञानेन तेषां मायापरिकल्पितदेहाद्युपाधीनां नाशे सति केवलो भवेत् एक एव भवति एक एवाकाशो घटपटाद्युपाधिषु नानेव भाति उपाधिविलयादेक एव भाति तद्वदित्यर्थः।9।।

नानोपाधिवशादेव ज्ञातानामाश्रमादयः।

आत्मन्यारोपितास्तोये रसवर्णादिभेदवत्।।10।।

व्या - ननु सर्वदेहेषु तत्तज्जात्यादिभिः अनुविद्धस्य कथं नित्यमुक्ततेत्यत्राह **नानेति**। पूर्वोक्तनानोपाधिवशादेव आत्मनि जातिनामाश्रमादयः आरोपिताः मायया परिकल्पिताः न तु स्वतः। यथा स्वभावमधुरं जलं निर्मलं कटुतिक्तमधुररक्तपीतादिद्रव्योपेतं सत् तत्तद्रूपं भवति न तु स्वरूपेण तद्वदित्यर्थः।।10।

पञ्चीकृतमहाभूतसम्भवं कर्मसञ्चितम्।

शरीरं सुखदुःखानां भोगायतनमुच्यते।।11।

 In Public domain. Digitization Muthulakshmi Research Academy

व्या - आत्मनो अविद्याकल्पितोपाधित्रयमध्ये स्थूलोपाधिमाह **पञ्चीकृतेति**। पञ्चानां भूतानां प्रत्येकं द्विधा विभज्य तत्र एकैकमर्धं चतुर्धा विभज्य स्वांशं परत्यज्य इतरेषु संयोजनं पञ्चीकरणम्। तेषु पञ्चीकृतेभ्यः स्थूलपृथिव्यादिमहाभूतेभ्यः सम्भवो यस्य तन्महाभूतसम्भवं सम्भृतमिति यावत्। प्रारब्धकर्मभिस्सञ्चितरचितं स्थूलशरीरं सुखदुःखानां भोगायतनं भोगस्थानं प्रत्यगात्मा इत्यर्थः।11।।

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्।।12।।

व्या - सूक्ष्मोपाधिमाह **पञ्चेति**। पञ्चप्राणाः एकस्यैव महाप्राणस्य प्राणादयः पञ्चवृत्तयस्स्युः ज्ञानेन्द्रियकर्मेन्द्रियभेदेन इन्द्रियाणि दश, मनश्शब्देन सङ्कल्पविकल्पात्मकान्तःकरणवृत्तिः उच्यते। बुद्धिर्निश्चयात्मिकान्तःकरण-वृत्तिः एतैः संयुक्तम् अपञ्चीकृतभूतेभ्यः इत्थं जातं सूक्ष्माङ्गं लिङ्गशरीरं सुखदुःखसाधनमुच्यत इत्यर्थः।12।।

अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते।
उपाधितृतीयादन्यमात्मानमवधारयेत्।।13।।

व्या - तृतीयं कारणोपाधिमाह **अनाद्यविद्या** इति। सदसद्भ्यामनिर्वचनीया अविद्या अनादिभूता कारणोपाधिरुच्यते।

 In Public domain. Digitization Muthulakshmi Research Academy

उपाधित्रयकथने प्रयोजनमाह **उपाधितृतीयादन्य** इति। तत्साक्षिणमात्मानम् अवधारयेत् जनीयादित्यर्थः।13।।

पञ्चकोषाधियोगेन तत्तन्मय इव स्थितः।
शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा।।14।।

व्या - ननु अन्नमयाद्येषु व्याप्ततत्तन्मया स्थितस्य मुक्तता कुतो नित्यशुद्धात्मन इत्याशङ्क्याह **पञ्चकोशादिति**। अन्नमयप्राणमयमनोमयविज्ञान-मयानन्दमयाः पञ्चकोशाः आदिपदेन अशनाया पिपासे प्राणधर्माः शोकमोहौ मनसः देहस्य जरामृत्यू इति षडूर्मिणां ग्रहणम्। एतैर्योगेन मिथ्या तादात्म्येन स्वतश्शुद्धात्मा तत्तन्मय इव स्थितः न तु तेषु वस्तुतो रञ्जनाभावेऽपि। 'स वा एष पुरुषोन्नरसमय' इत्यादिभिः सूक्ष्मवस्तुनि दर्शनार्थमेवोपाधिस्थं ब्रह्म सूचयति। स तु तत्त्वदृष्ट्या यथा निर्मलस्फटिको नीलपीतवस्त्रादियोगेन तत्तन्मय इव भाति वस्तुतो नास्ति तेन रञ्जना तद्वदित्यर्थः।14।।

वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यवघाततः।
आत्मानमातरं शुद्धं विविच्यात्तं तुलं यथा।।15।।

व्या - आत्मस्वरूपज्ञानाय विवेचनप्रकारमाह **वपुस्तुषादिभिरिति**। पञ्चकोशैस्तावदात्मनो मिथ्या तादात्म्येन कल्पितं वपुः स्थूलशरीरादिकमतस्तद्युक्तमिव स्थितं

शुद्धमन्तरमात्मानं तुषादिभिर्युक्तं तण्डुलमिव युक्त्यवघाततः मननाद्यवहननात् विविच्याद्विवेकेन जानीयात्। अयं स्थूलदेहो नात्मा भूतकार्यत्वात् घटादिवत्, सूक्ष्मोऽपि तथैव नात्मा देहत्वात्, स्थूलदेहानात्मानुमानादिना तेभ्यः कोशेभ्यः भिन्नमात्मानं विविच्य जानीयादित्यर्थः।15।।

सदा सर्वगतोऽप्यात्मा न सर्वत्रावभसते।
बुद्धावेवावभासेत स्वच्छेषु प्रतिबिम्बवत्।।16।

व्या - ननु यद्यात्मा सर्वगतः तर्हि किं सर्वत्र सर्वैः न दृश्यत इत्यत्राह **सदेति**। आत्मा सदा स्वगतोऽपि सर्वत्र व्याप्य स्थितोऽपि न सर्वत्र प्रकाशते। सर्वत्र स्वयं प्रकाशमानोऽपि बहिः प्रवृत्तानां जडानां चक्षुरादीनां विषयत्वेन न प्रकाशते। किन्तु रागादिभिः अविद्यायां बुद्धावेवावभासते। यथा प्रतिबिम्बिस्वच्छेषु दर्पणादिष्वेव दृश्यते न सर्वत्र तद्वदित्यर्थः।16।।

देहेन्द्रियनमोबुद्धिप्रकृतिभ्यो विलक्षणम्।
तद्वृत्तिसाक्षिणं विन्द्यादात्मानं राजवत्सदा।।17।।

व्या - देहे स्थितस्याप्यात्मनः औदासीन्यं राजपुरुषदृष्टान्तेनाह **देहेन्द्रियेति**। देहेन्द्रियमनोबुद्धिप्रकृतिभ्यः जडेभ्यः दृश्येभ्यः विलक्षणं तद्वृत्तीनां साक्षितया स्थितं शुद्धात्मानं

In Public domain. Digitization Muthulakshmi Research Academy

विन्द्यात्। यथा राजा स्वनगरे स्थितो मन्त्रिषु प्रवर्तमानेषु स्वयं साक्षितया तान् पश्यन् तिष्ठति तद्वदित्यर्थः।17।।

व्यापृतेष्विन्द्रियेष्वात्मा व्यापारी वा विवेकिनाम्।
दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी।।18।।

व्या - ननु आत्मनो अविकारित्वमयुक्तं सर्वदा व्यापृतत्वेनादृश्यत्वादित्यत्राह **व्यापृतेष्विति**। इन्द्रियादिषु स्वविषयेषु व्यापृतेषु सत्सु आत्मा व्यापारीव अविवेकिनां गुरुशास्त्राद्युपदेशरहितानां दृश्यते न तु तत्त्वदृष्ट्या। यथा मेघखण्डेषु वायुवशाद्धावत्सु सत्सु चन्द्रोऽपि धावतीव लौकिकैर्दृश्यते न तु चन्द्रमा धावति तथात्मा अपीत्यर्थः।18।।

आत्मचैतन्यमाश्रित्य देहेन्द्रियमनो धियः।
स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः।।19।।

व्या - ननु देहेन्द्रियमनोबुध्यात्मनोप्यात्मवत्किमर्थं चेतना दृश्यन्ते तत्राह **आत्मेति**। नित्यज्ञानस्वरूपस्यात्मनः चैतन्यमाश्रित्य देहेन्द्रियमनोबुध्यादयः स्वकीयार्थेषु स्वविषयेषु वर्तन्ते। यथा जनाः सूर्यप्रकाशमाश्रित्य स्वयं व्यापारेषु व्यवहरन्ति तद्वदात्मा चैतन्यं ज्ञानमात्मन एव देहेन्द्रियादयस्तु जडा एवेत्यर्थः।19।।

In Public domain. Digitization Muthulakshmi Research Academy

देहेन्द्रियगुणान्कर्माण्यमले सच्चिदात्मनि।

अध्यस्यन्त्यविवेकेन गगने नीलतादिवत्।।20।।

व्या - ननु अहं जातोऽस्मि बाल्ययैवनकौमारावस्थामनुभवामि पश्यामि तिष्ठामीत्याद्यनवरतमनुभूयमानस्यात्मनः कथमविकारित्वमुच्यत इत्यत्राह देहेन्द्रियगुणानिति। देहेन्द्रियमनोबुद्धिधर्मान् गुणांश्च सत्वादीन् कर्माणि च कर्मेन्द्रियव्यापारास्तैर्मिथ्या तादात्म्येन स्थिते निर्मलेऽसङ्गरूपे सच्चिदानन्दरूपे परमात्मन्यत्यन्तसामीप्यादविवेकतो अध्यस्यन्ति। यथा निर्मले निरवयवाकाशे बालाः नीलतामध्यस्यन्ति तद्वदतस्मै आत्मधर्माः न भवन्ति अपि तु देहेन्द्रियादीनामेवेत्यर्थः।20।।

आज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि।

कल्प्यन्तेऽम्बुगते चन्द्रे चलनादिर्यथाम्भसः।।21।।

व्या – कर्तृत्वभोक्तृत्वादिकमात्मन्यनवरतमनुभूयमानत्वात्तद्दुर्वारामित्याशङ्क्य तदपि तथैवेत्याह अज्ञानादिति। मानसमेवोपाधिमानसोपाधिस्तस्यैव कर्तृत्वादयो धर्माः तदज्ञानवशादिहात्मनि कल्प्यन्ते। यथाम्भसः चलनादिधर्मा अम्भुनि प्रतिफलिते चन्द्रमस्यविवेकतः कल्प्यन्ते तद्वदात्मनीत्यर्थः।21।।

In Public domain. Digitization Muthulakshmi Research Academy

रागेच्छासुखदुःखादिबुद्धौ सत्यां प्रवर्तते।

सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः।।22।।

व्या - इच्छा द्वेषसुखदुःखादीनात्मधर्मान्मन्यन्ते वैशेषिकाः तन्निराकरोति **रागेति**। रागेच्छासुखदुःखादिकं सर्वं बुद्धेरेव नत्वात्मनः कथमिति चेज्जाग्रत्स्वप्नयोः बुद्धौ सत्यां रागादि प्रवर्तते। सुषुप्तौ तस्याः बुद्धेः नाशे कारणे क्षीणे सति तन्न प्रवर्तते। तस्मात् बुद्धेरेव धर्माः न त्वात्मन इत्यर्थः।22।।

प्रकाशोर्कस्यतो यस्य शैत्यमग्नेर्यथोष्णता।

स्वभावस्सच्चिदानन्दनित्यनिर्मलतात्मनः।।23।।

व्या - तस्यात्मनः कीदृशस्य भाव इत्याकाङ्क्षायामात्मस्वभावमुपदिशति **प्रकाश** इति। यथा प्रकाश एवार्कस्य स्वभावस्तोयस्य शैत्यमग्नेरुष्णतात्मनोऽपि सच्चिदानन्दनित्यनिर्मलता आत्मनः स्वभाव स्स्वरूपमित्यर्थः।23।।

आत्मनस्सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम्।

संयोज्य चाविवेकेन जानातीति प्रवर्तते।।24।।

व्या - यद्यविकार्यात्मा तर्हि जानानीति प्रत्ययः कथमित्यपेक्षायामाह **आत्मन** इति। प्रत्यगात्मनः सच्चिदंशश्च अंश इव अंशः आत्माभासः बुद्धेर्वृत्तिश्च एतद्द्वयमविवेकेन संयोज्य असङ्गस्यात्मनः तेनापि सङ्गो नास्त्येव। तथा स्वज्ञानवशान्मेलनं

In Public domain. Digitization Muthulakshmi Research Academy

सम्भाव्य जानातीति प्रत्ययस्य आभासः अहङ्कारवृत्तिः प्रवर्तते केवलप्रत्यगात्मनि न किञ्चिद्विकारोऽस्तीति भावः।।24।।

आत्मनो विक्रियो नास्ति बुद्धेर्बोधो न जात्विति।

जीवस्सर्वमलं ज्ञात्वा ज्ञाता द्रष्टेति मुह्यति।।25।।

व्या - एतदेव स्पष्टयति **आत्मन** इति। जीवः आत्मा स्वभावादेव विक्रयः विकारशून्यः। बुद्धेः कदाचिदपि बोधो नैव नास्ति तथापि जीवः साभासाहङ्कारं सर्वं साभासान्तःकरणवृत्यादिकं तप्तायः पिण्डवदेकत्वेनालम् अत्यर्थं ज्ञात्वा अहङ्कर्ता द्रष्टा श्रोतेति मुह्यति भ्रान्तो भवतीत्यर्थः।।25।।

रज्जौ सर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत्।

नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत्।।26।।

व्या - तस्मादात्मा स्वयमेव स्वस्मिन्नविवेकेन अन्यधर्मानारोप्य बिभ्यतीत्याह **रज्जौ** इति। यथा मन्दान्धकारे विकाररहितरज्वादौ सर्पारोहणं कृत्वा भयकम्पादिचिह्नं ज्ञात्वा बहुदुःखसागरमग्नो भवति। यथा शास्त्राचार्यप्रसादेन वेदान्त-शास्त्रार्थज्ञानमुत्पन्नं भवति तदा विवेकचक्षुषा स्वात्मानमद्वितीय-मपरिच्छिन्नमखण्डानन्दैकरूपं संपश्यन् ततो नाहं जीवः परमात्माहमिति ज्ञात्वा भयदुःखादिरहितः सुखी भवेत्।।26।।

 In Public domain. Digitization Muthulakshmi Research Academy

आत्मावभासयत्येको बुद्ध्यादीनीन्द्रीयाणि च।
दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते।।27।।

व्या - आत्मात्वन्तर्गतैर्बुद्धिमनोहङ्कारादिभिः कथं नावलोक्यते न ज्ञायते तत्राह **आत्मेति**। आत्मा एक एव सन् बुद्धिमनोहङ्कारादीनवभासयति अवभासितैर्जडैर्मन आदिभिर्नावभास्यते। यदा एक दीपः घटादीन् सर्वान् अवभासयति तैर्घटादिभिर्नावभास्यते तद्वदित्यर्थः।।27।।

स्वबोधेनान्यबोधेच्छाबोधरूपतयात्मनः।
न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने।।28।।

व्या - आत्मा बुद्ध्यहङ्कारादिभिर्नावभास्यते चेत् तर्हि आत्मज्ञानं ज्ञानान्तरेण कथं भवितव्यमित्याशङ्क्य नेत्याह **स्वबोधेनेति**। आत्मनः बोधरूपत्वात् स्वबोधे नित्ये सति तस्यात्मनो बोधाय ज्ञानान्तरापेक्षा नास्त्येव। अनुभवरूपत्वाद्यथा दीपस्य स्वप्रकाशने दीपान्तरापेक्षा नास्त्येव तद्वदित्यर्थः।।28।।

निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः।
विन्द्यादैक्यम्महावाक्यैः जीवात्मपरमात्मनोः।।29।।

व्या - यदि बुद्ध्यादिभिः आत्मा ज्ञेयो न भवेत् तर्हि आत्मज्ञाने उपायान्तरं वक्तव्यं स उपायः क इत्यत आह **निषिध्येति**। अथात आदेशो नेति नेतीत्याद्येतन्निरसनवेदान्तवाक्यैः

In Public domain. Digitization Muthulakshmi Research Academy

तत्त्वं पदार्थगतसर्वज्ञत्वकिञ्चिज्ञत्वाद्यखिलोपाधीन् निषिध्य अनात्मत्वेन ज्ञात्वा निरस्य तत्त्वमसि, अहं ब्रह्मास्मि, अयमात्मा ब्रह्म, तद्योहमित्यादिमहावाक्यैः लक्षणया ब्रह्मात्मैक्यज्ञानं प्राप्तमाप्नुयादनेन प्रकारेण ज्ञातव्यमित्यर्थः।29।।

आविद्यकं शरीरादिदृश्यं बुद्बुदवत्क्षरम्।
एतद्विलक्षणं विन्द्यादहं ब्रह्मास्मि निर्मलम्।।30।।

व्या - आत्मस्वरूपज्ञाने तन्निरसनाभावे का क्षतिरित्याशङ्क्य तन्निरसनाभावे आत्मा ज्ञातुमशक्यः यथा नायं सर्व इत्यारोपितस्य सर्वस्यापि करणाभावे रज्जुज्ञानं नोपपद्यते। तद्वदनात्मा निरसने आत्मा ज्ञातव्य इत्याशयेनाह **आविद्यकमिति**। देहेन्द्रियादिसर्वं वस्तुजातं आविद्यकं अविद्याकल्पितं दृश्यत्वात् उद्बुदवत्, क्षरं एतद्विलक्षणं देहेन्द्रियादिभ्यो विलक्षणं निर्मलं निरुपाधिकं नित्यम् एकं सच्चिदानन्दात्मकं ब्रह्मैवाहमस्मीति विन्द्यात्। ततः कृतकृत्यो भवतीत्यर्थः।।30।।

देहान्यत्वान्नमे जन्म जराकार्श्यतयादयः।
शब्दादिविषयैस्सङ्गो निरिन्द्रियतयैव च ।।31।।

व्या - एवमुक्तरीत्या आत्मानमद्वयानन्दं वाक्यार्थज्ञाने न अपरोक्षतां ज्ञात्वा स्वानुभवावष्टम्भेन आत्मन्येवात्मनो मननप्रकारमाह **देहान्यत्वेति**। पञ्चभिः श्लोकैः जडदृश्यत्वादि-

In Public domain. Digitization Muthulakshmi Research Academy

स्वभावस्थूलशरीराद्यन्यत्वान्मे जन्मजराकार्ष्य-लयादयो न सन्ति। इन्द्रियादिभिः असङ्गत्वान्मे शब्दादिविषयभोगै-स्सङ्गोऽनुभवश्च नास्त्येव।।31।।

अमनस्त्वान्न मे दुःखरागद्वेषभयादयः।
अप्राणो ह्यमनाश्शुभ्र इत्यादिश्रुतिबोधनात्।।32।।

व्या - अमनस्त्वान्मे दुःखादिकं नास्तीत्याह **अमनस्त्वादिति**। मनस्सम्बन्धाभावाद्रागद्वेषभयकामसङ्कल्पादयः न सन्ति कथमिन्द्रियप्राणमनसा भयादयस्तवेत्याशङ्क्य श्रुतिं प्रमाणयति। तत्र श्रुतिः अप्राणो ह्यमनाश्शुभ्रो विश्वस्य धारिणीत्यादि। स्पष्टार्थश्श्लोकः।।32।।

निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः।
निर्विकारो निराकारो नित्यमुक्तोऽस्ति निर्मलः।।33।।

व्या - गुरोः प्रसादात् स्वानुभवसिद्धमर्थं चाभिनयति निर्गुण इति त्रिभिः। निर्गुणः बुध्याभावात् निष्क्रियः इन्द्रियाद्यभावात् नित्यः अपक्षयाभावात् निर्विकल्पः निर्मनस्त्वात् निरञ्जनः अनन्तत्वात् निर्विकारः षोडषकलात्मकलिङ्गदेहशून्यत्वात् निराकारः निरवयवत्वात् नित्यमुक्तः सम्बन्धाभावात् निर्मलः अविद्यातत्कार्यरहितत्वात्।।33।।

In Public domain. Digitization Muthulakshmi Research Academy

अहमाकाशवत्सर्वं बहिरन्तर्गतोऽच्युतः।

सदा सर्वसमश्शुद्धो निस्सङ्गो निर्मलोऽचलः।।34।।

व्या - ननु पूर्वोक्तैर्हेतुभिरेव विशिष्टं स्वरूपमज्ञासिषमित्युक्ते तत्किं शिष्टमित्याशङ्क्य आह **अहमिति**। अहं आकाशवत्सर्वस्य दृश्यजातस्य बहिरन्तर्गतः दृश्यं सर्वमहमेव मद्विवर्तत्वात् अच्युतः च्युतिरहितः सदा सर्वसमः विषमेष्वपि समं व्याप्यस्थितिः। तथापि शुद्धः निस्सङ्गः निर्लेपः निर्मलः मलरहितः अचलः पूर्णस्य चलनाद्यभावात्।।34।।

नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयम्।

सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत्।।35।।

व्या - पुनः स्वरूपं निरूपयति **नित्येति**। नित्यशुद्धविमुक्तत्वे सति एकमखण्डानन्दं द्वितीयाभावादद्वयं यद्वस्तु **सत्यं ज्ञानमनन्तं ब्रह्मेति** श्रुत्या सत्यज्ञानात्मकत्वेन प्रतिपाद्यते। तत्परं ब्रह्मेवाहमस्मीति स्वस्वरूपं तत्त्वं कथितम्।।35।।

एवं निरन्तरं कृत्वा ब्रह्मैवास्मीति वासना।

हरत्यविद्या विक्षेपान् रोगानिव रसायनम्।।36।।

व्या - पूर्वश्लोकोक्तमननं चिरकालाभ्यासात्पुरुषार्थं साधयतीत्याह। एवमुक्तप्रकारेण ब्रह्मैवाहमस्मीति नैरन्तर्येण चिरकालाभ्यस्ता वासना अविद्या- कृतचित्तविक्षेपान् निश्शेषतो

In Public domain. Digitization Muthulakshmi Research Academy

नाशयति। यथा रसायनमौषधं चिरकालसेवितं रोगान् निश्शेषतो नाशयति तद्वदित्यर्थः।।36।।

विविक्तदेश आसीनो विरागो विजितेन्द्रियः।
भावयेदेकमात्मानं तमनन्तमनन्यधीः।।37।।

व्या - ब्रह्मानुसन्धाने नियमानाह **विविक्तदेश** इति। विविक्ते जनसम्बन्धवर्जिते देशे आसीनः विरागः सर्वत्र गताभिलाषः विजितेन्द्रियः अनन्यधीस्सन् ब्रह्मण्येव स्थितानिश्चयात्मिकाबुद्धिः यस्य स एवंरूपः नियमयुक्तस्सन् अनन्तमपरिच्छिन्नमद्वयमेकं तमात्मानं स्वरूपत्वेन भावयेत्।।37।।

आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः।
भावयेदेकमात्मानं निर्मलाकाशवत्सदा।।38।।

व्या - दृश्यप्रपञ्चे जाग्रति कथमेकत्वभावना सम्भवतीत्याह **आत्मनीति**। अखिलदृश्यजातं सुधीश्शुद्धान्तःकरणस्सन् शुद्धया धिया आत्मन्येव समाधिसमये प्रविलाप्य प्रकर्षेण नाशयित्वा अधिष्ठानव्यतिरेकेणारोपयन्नास्तीति निश्चित्य तदा तद्वितीयाभावादेकमात्मानं न ज्योत्स्नाकाशवद्भावयन् तिष्ठन्।।38।।

रूपवर्णादिकं सर्वं विहाय परमार्थवित्।
परिपूर्णचिदानन्दस्वरूपेणावतिष्ठते।।39।।

In Public domain. Digitization Muthulakshmi Research Academy

व्या - परमार्थदर्शी मुनिः नामरूपादिकमाविद्यकं सर्वं विहाय परिपूर्णज्ञानानन्दस्वरूप एवावतिष्ठत इत्याह रूपमित्यादिना। स्पष्टोऽर्थः।।39।।

ज्ञातृज्ञानज्ञेयभेदः परेवात्मनि विद्यते।
चिदानन्दैकरूपत्वाद्दीप्यते स्वयमेव हि।।40।।

व्या - ननु प्रमात्रादित्रिपुटीज्ञानं वर्ण्यमानमुपलभ्यते कथमेकत्वभावना इत्याशङ्क्य परमात्मनि भेदो नास्तीत्याह **ज्ञातृज्ञानज्ञेयभेद** इति। ज्ञातृज्ञानज्ञेयभेदः परमात्मनि न विद्यते। न भेदः अविद्याकर्तृक आत्मन्येवाभाति न वस्तुतः। ज्ञानानन्दैकरूपत्वादात्मा स्वयमेव दीप्यते प्रकाशते।।40।।

एवमात्मारणौ ध्यानमथने सततं कृते।
उदितावगतिर्ज्वाला सर्वा ज्ञानेन्धनं दहेत्।।41।।

व्या - एवं शुद्धवस्तुज्ञानस्य फलमाह **एवमिति**। आत्मारणौ आत्मा अन्तःकरणमेवारणिस्तस्मिन्नेव ध्यानेन मथने सर्वदा कृते सति तत्रोदितावगतिः ज्वालारूपा अवगतिरपरोक्षज्ञानमज्ञानमिवेन्धसङ्गपरिकरमज्ञानं निश्शेषतो नाशयति। तदा मुमुक्षुस्स्वाराज्येऽभिषिक्तः कृतकृत्यो भवतीत्यर्थः।।41।।

अरुणे नावबोधेन पूर्वं सन्तमसे हृते।
तत आविर्भवेदात्मा स्वयमेवांशुमानिव।।42।।

 In Public domain. Digitization Muthulakshmi Research Academy

व्या - जीवपरमयोरत्यन्तैक्यज्ञानेन अविद्याकल्पितान्धतमसि निश्शेषमपयाते सति परमात्मा स्वयमेव आविर्भवेदित्याह **अरुणेनेति**। अरुणप्रकाशेन गाढान्धकारक्षये सति पश्चात् अंशुमान्यथा आविर्भवेत् तद्वदित्यर्थः।।42।।

आत्मा तु सततं प्राप्तोऽप्यप्राप्तपदविद्यया।
तन्नाशे प्राप्तवद्भाति स्वकण्ठाभरणं यथा।।43।।

व्या - आत्मा सर्वदा परोक्षस्वभावत्वादप्राप्त एव पश्चाद्विद्याबलादात्मान्तरे प्राप्तो भवेदिति शिष्याभिप्रायमाशंक्यात्मनस्स्वस्यान्तःकरणसाक्षित्वेनापरोक्षता नैवमित्याह **आत्मेति**। आत्मनस्सर्वत्र पूर्णत्वादद्वयानन्दरूपत्वादन्तःकरणवृत्ति-साक्षित्वेन सर्वदा प्राप्त एवाविद्यावशादप्राप्त इह भाति। कण्ठगतचामीकरवदित्यर्थः।।43।।

स्थाणौ पुरुषवद्भ्रान्त्याकृता ब्रह्मणि जीविता।
जीवस्य तात्विके रूपे तस्मिन् दृष्टे निवर्तते।।44।।

व्या - ननु जीवस्य परमात्मना एकत्वमयुक्तं जीवत्वविरोधात्स्वभावस्य अपरिहार्यत्वादित्यत्राह **स्थाणाविति**। अन्धकारे स्थिते स्थाणौ पुरुषोऽयमिति चोरादिशङ्कया बिभेति। तथैव भ्रमाद्ब्रह्मणि जीवत्वमारोप्यते शास्त्रोपदेशाज्जनितविवेकदृष्ट्या तस्य जीवस्य तात्विके रूपे लक्ष्ये तत्त्वंपदार्थै दृष्टे ज्ञाते सति

In Public domain. Digitization Muthulakshmi Research Academy

कल्पितत्वाज्जीवत्वं विनिवर्तते। अतो भयरूपत्वान्न किञ्चिद्विरोधोऽस्तीत्यर्थः।।44।।

तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमञ्जसा।
अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत्।।45।।

व्या - ननु अयं मनुष्यो ब्राह्मणो ममायं पुत्रः पशुरित्यादिप्रत्यये जाग्रति सति कथं नाहं मनुष्य इत्यादि प्रत्यय इत्याशङ्क्य तथापि तथैव मनुष्येत्याह **तत्वेति**। जीवपरयोरेकत्वानुभवादुत्पन्नज्ञानमहं ममेत्यज्ञानं बाधते। दिग्भ्रमादिभानु-दर्शनादिवदित्यर्थः।।45।।

सम्यग्विज्ञानवान् योगी स्वात्मन्येवाखिलं स्थितम्।
एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा।।46।।

व्या - अहं ममेति प्रत्यये नष्टे योगी सम्यग्विज्ञानवान् विज्ञानेन चक्षुषा सर्वदृश्यप्रपञ्चं स्वात्मन्येवाभेदेन पश्यतीत्यत्राह **सम्यगिति**। यदा एकमात्मानं सर्वं पश्यति तदा कृतकृत्यो भवतीत्यर्थः।।46।।

आत्मैवेदं जगत्सर्वमात्मनोन्यमकिञ्चन।
मृदो यद्यद्घटादीनि स्वात्मानं सर्वमीक्षते।।47।।

व्या - ननु आत्मा सर्वं न भवति प्रत्यक्षविरोधान्नानात्वेन दृश्यमानमिदं सर्वं कथमभेदेन पश्यति तत्राह **आत्मैवेति**। इदं सर्वं

In Public domain. Digitization Muthulakshmi Research Academy

जगदात्मैवात्मकार्यत्वात् अतोऽन्यदात्मनोन्यत्किञ्चिन्नविद्यते। यथा घटशरावादिमृत्कार्यं मृदोऽन्यन्नास्ति तद्वदतः स्वात्मन्येव सर्वं दृश्यजातमभेदेनेक्षते पश्यति **'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति'** श्रुतेः।।47।।

जीवन्मुक्तस्तु तद्विद्यात्पूर्वोपाधिगुणांस्त्यजेत्।
स सच्चिदादिधर्मत्वाद्भजे भ्रमरकीटवत्।।48।।

व्या - एवम्भूतावस्थैव जीवन्मुक्तिरिति अनाद्यविद्या-परिकल्पितपूर्वोपाधीन् देहमनोबुध्यादीन् गुणांश्च सत्वादीन् नाहमिति परित्यजेदिति यत्तदेव जीवन्मुक्तिरित्युच्यते। एवंभूतावस्थावान् स सच्चिदानन्दादिगुणत्वाद्भ्रमर-कीटवद्भजे प्राप्नोतीत्यर्थः।।48।।

तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान्।
योगी शान्तिसमायुक्तो आत्मारामो विराजते।।49।।

व्या – ततस्स्वात्मारामस्सुखं तिष्ठतीत्याह **तीर्त्वेति**। मोह एवार्णवः अपर्यन्तत्वात्तं ज्ञानप्लवेन तीर्त्वा निश्शेषं नाशयित्वा रागद्वेषादय एव राक्षसाः मोक्षपरिपन्थिनः तान् निश्शेषतो नाशयित्वा शान्तिसमायुक्तश्शमदमादि सहितः आत्माराम आत्मन्येव क्रीडा यस्य सः तादृशः विराजते प्रकाशते। अत्र

In Public domain. Digitization Muthulakshmi Research Academy

अर्थान्तरं व्याचष्टे। श्रीरामः समुद्रं तीर्त्वा रावणादिराक्षसान् हत्वा सीतयागमो यथा अयोध्यायां विराजते तद्वदित्यर्थः।।49।।

बाह्यनित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः।
घटस्थदीपवत्सोऽपि अन्तरेव प्रकाशते।।50।।

व्या - जीवन्मुक्तस्य लक्षणमाह बाह्येति। बाह्येन्द्रिय-विषयोद्भवात् नित्यसुखासक्तिप्रीतिनिवासनां हित्वा तत्र हेतुरात्मसुखेन निर्वृत्तस्सन् सर्वदा घटस्थदीपवदन्तरेव प्रकाशते स्वसाक्षिकमेवात्मानुभवसुखमितरैर्विज्ञायत इत्यर्थः।।50।।

उपाधिस्थोपि तद्धर्मैरलिप्तो व्योमवन्मुनिः।
सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत्।।51।।

व्या - एवमुक्तप्रकारेण जीवन्मुक्तः प्रारब्धक्षयपर्यन्तमेवं वर्तितव्य-मित्याह **उपाधिस्थ** इति। देहाद्युपाधौ तत्साक्षित्वेन स्थितोऽपि मुनिः व्योमवत् तद्धर्मैः कृशस्थूलत्वादिभिः कर्मभिः असक्तोहमिति भावयेत्। सर्वज्ञो अमूढवत्प्राकृतवत्तिष्ठेत्। सर्वत्र विषयेषु च यदृच्छया प्राप्तेऽपि अनासक्तो वायुवच्चरेत्।।51।।

उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः।
जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा।।52।।

व्या - स्थूलसूक्ष्मदेहोपाधौ लीने विदेहकैवल्यमाह उपाधीति। उपाधिविलये प्रारब्धकर्मसङ्क्षये नष्टे सति मुनिर्योगी

In Public domain. Digitization Muthulakshmi Research Academy

विष्णौ सर्वव्यापके परब्रह्मणि निर्विशेषं यथा तथा विशेषजान्त्यन्तैक्यदृष्टान्तः। जले जलमित्यादि महाजलाशये घटोपाधिविनिर्मुक्तजले यथा महाकाशे घटोपाधिविनिर्मुक्ताकाशो यथा ह्यग्नौ विस्फुलिङ्गादिर्यथा विशेत्तद्वदात्मापीत्यर्थः।।52।।

यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम्।
यद्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्।।53।।

व्या - ब्रह्मणस्सर्वातिशयित्वात् तटस्थलक्षणेन अभिधत्ते श्लोकद्वयेन यल्लाभाद्ब्रह्मसाक्षात्कारलाभादपरो लाभो न विद्यते। सर्वलाभानां तत्रैवान्तर्भावात् यदा ब्रह्मानन्दे क्षुद्रानन्दानामन्तर्भावः यत्सुखाद्ब्रह्मानुभवसुखादपरं सुखं नास्ति निरतिशयसुखत्वात्। यद् ज्ञानं ब्रह्मसाक्षात्कारज्ञानादपरं नास्ति एकस्य ज्ञानस्य परमपुरुषार्थमोक्षहेतुत्वात् तद्ब्रह्मेति विजानीयात्।।53।।

यद् दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः।
यद्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्।।54।।

व्या - पुनरपि ब्रह्मलक्षणमाह यद्दृष्ट्वा स्वस्वरूपतया अपरमन्यत् द्रष्टव्यं नास्ति। तेनैव पुरुषार्थस्य समर्थितत्वात् यद्भूत्वा येनैक्यं प्राप्य पुनर्भवो जन्मादिकं नास्ति। यद्ज्ञात्वा यत्स्वरूपं ज्ञात्वा अन्यत् ज्ञेयं नास्ति तदेव ब्रह्मैक्यमवधारयेत् अन्यत् सर्वं वृथा पाण्डित्यमित्यर्थः।।54।।

In Public domain. Digitization Muthulakshmi Research Academy

तिर्यगूर्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम्।
अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत्।।55।।

व्या - तिर्यगूर्ध्वमधः सर्वत्र ब्रह्मेव पूर्णमित्याह **तिर्यगिति**। स्पष्टोऽर्थः।।55।।

अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यते स्वयम्।
अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत्।।56।।

व्या - अखण्डानन्दमेकं ब्रह्म तावत् अथात आदेशो नेति नेतीति अतद्व्यावर्तकवेदान्तवाक्यैः अतन्निरसनद्वारा ज्ञातव्यमित्याह **अतदिति**। स्पष्टोऽर्थः।।56।।

अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः।
ब्रह्माद्यास्तारतम्येन भवन्त्याऽनन्दिनो लवाः।।57।।

व्या - ननु ब्रह्मादयोऽपि निरतिशयानन्दिन एव श्रूयते। तल्लोकमेव काङ्क्षन्तोऽश्वमेधादिकं कुर्वन्ति। तेषां ब्रह्मत्वेनानुपपत्तिरित्यत आह **अखण्डेति**। ब्रह्मेन्द्रादयो परिच्छिन्नानन्दिन एव ब्रह्मत्वाखण्डानन्दसमुद्रस्यानन्द-लेशमाश्रित्य ब्रह्मेन्द्रादयोऽपि आनन्दिन एव भवन्ति। आनन्दतारतम्येन एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः।।57।।

In Public domain. Digitization Muthulakshmi Research Academy

तद्युक्तमखिलं वस्तु व्यवहारश्चिदन्वितः।

तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिलम्।।58।।

व्या - परमप्रेमास्पद आत्मैव भातीत्युच्यते तद्युक्तः अनात्माप्यनादिदेहादिप्रपञ्चः प्रियतर एवानुभूयत इत्यत आह तद्युक्तमिति। अखिलं देहाद्यनात्मवस्त्वपि तद्युक्तं तेन संयुक्तमेव प्रियतरं लौकिकोऽपि व्यवहारश्चिद्युक्त एव प्रियः। तस्मात् सर्वगतं ब्रह्मात्यन्तप्रियं क्षीरे व्याप्य स्थितं घृतमिव अवस्त्वपि ब्रह्मव्याप्यत्वात् प्रियमिव आभात्यतः आत्मैव प्रिय इति सिद्धम्।।58।।

अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम्।

अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत्।।59।।

व्या - कस्यात्मा केन वा प्रकारेण सर्वं व्याप्य तिष्ठतीति जानीयात् इत्याशङ्क्य साक्षाद्वक्तुमशक्यत्वादनण्वस्थूलमित्यादिश्रुत्या अतन्निरसनद्वारा निषेधादिहेतुभूतं सन्मात्रं ब्रह्मेति जानीयादित्याह अनण्वस्थूलमिति। स्पष्टोऽर्थः।।59।।

यद्भानं भास्यतेर्कादीन् भास्यैर्यत्तु न भास्यते।

येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत्।।60।।

व्या - पुरः तद्ब्रह्मज्ञानार्थं श्लोकत्रयेण पृथक् प्रबन्धं निरूपयति यद्भानमित्यादिना। यद् ज्ञानं यत् प्रकाशात्मकं वस्तु

In Public domain. Digitization Muthulakshmi Research Academy

भान्वादीनवभासयेत् यत्तु भास्यैरर्कादिभिः नावभास्यते **न तत्र सूर्यो भाति** विभातीति श्रुतेः। येन ब्रह्मणा सर्वमिदं भूतभौतिकं जगद्भाति तद्ब्रह्म इति विजानीयात्। स्वयमेवान्तर्बहिर्व्याप्य भासयत्यखिलं जगत् ब्रह्म प्रकाशते वह्निप्रतप्तायसपिण्डकादिवत्।60।।

जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्न विद्यते।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका।।61।।

व्या - तप्तायःपिण्डमग्निरिव स्वयमेवान्तर्बहिर्जगद्व्याप्याखिलं भासयद्ब्रह्म प्रकाशत इत्याह **जगदिति। सर्वं खल्विदं ब्रह्मेति** श्रुत्या ब्रह्मैव सर्वाकारेण भासते। ततोऽन्यत्किमपि नास्तीत्येतदेव सत्यं। तथापि यज्जगद्रूपेण यदा पश्यन्ति तदा अज्ञानिभिः जगच्चान्यद्ब्रह्माप्यन्यदिति सद्वैलक्षण्येनैव ब्रह्म गृह्यते। **यतो वा इमानि भूतानि जायन्ते** इत्यादि श्रुत्या ब्रह्म कार्यत्वेन जगद्विचारितं चेत्तदा सर्वज्ञैर्ज्ञातुं शक्यते ब्रह्मणोऽन्यन्न विद्यत इति। एवञ्च सति यदि ततोऽन्यत् दृश्यते यत्किञ्चित् अस्ति तन्मृषैव मरुमरीचिकाजलवदित्यर्थः।।61।।

दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत्।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम्।।62।।

व्या - तदेव स्फुटतरं निरूपयेत् **दृश्यत** इति। चक्षुषा यद्दृश्यते श्रोत्रेण यच्छ्रूयते मनसा यत् स्मर्यते वाचा यदभिधीयते

In Public domain. Digitization Muthulakshmi Research Academy

तत्त्वज्ञानात् परमार्थतो विचार्यमाणे तत्सर्वं सच्चदानन्दमद्वयं ब्रह्मैव ब्रह्मणोऽन्यन्न किञ्चिदित्यर्थः।।62।।

सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत्।।63।।

व्या - यदि सर्वगतं ब्रह्म तत्सर्वैः किं न दृश्यत इत्यत आह **सर्वगमिति।** तत्तधिष्ठानतत्त्वेन सर्वगं सच्चिदानन्दमात्मानं ज्ञानचक्षुर्वेदान्तश्रवणाद्ब्रह्म परोक्षज्ञानवान् स्वरूपत्वेनेक्षते। अज्ञानचक्षुर्देहेन्द्रियात्मबुद्धिस्सर्वोपाधिविनिर्मुक्तमात्मानं सर्वगतमपि स्वस्वरूपत्वेन नेक्षते। अन्धस्तु यथा सर्वत्र विद्यमानं महाप्रकाशमादित्यं द्रष्टुं न शक्नोति तद्वदित्यर्थः। तत्र श्रुतिः **न चक्षुषा गृह्यते नापि वाचा निष्कलं ध्यायमानः।** अयमभिसन्धिः आत्मनो बोधरूपत्वेन अदृश्यत्वाच्चक्षुरादीन्द्रियैर्न गृह्यते। तद्वत् तपसा कर्मणा वा न प्राप्यते। कर्मसाध्यस्यानित्यत्वात्तस्मात् ज्ञानप्रसादेन ज्ञानचक्षुषा विशुद्धसत्वः निवृत्ताविद्यः सर्वदा सर्वत्र ब्रह्मैव पश्यतीत्यतः सर्वत्र सर्वैः द्रष्टुं न शक्यत इत्यर्थः।।63।।

श्रवणादिभिर्दीप्तात्मा ज्ञानाग्निपरितापितः।
जीवस्सर्वमलान्मुक्तस्स्वर्णवद्-द्योतते स्वयम्।।64।।

व्या - एतावदुक्तरीत्या अनुभवसम्पन्नः स्यात्। तदभ्यासरहितस्य वासनावशात् किञ्चिदज्ञानं सम्भवति।

In Public domain. Digitization Muthulakshmi Research Academy

तत्परिहारार्थं पुनः श्रवणाद्यभ्यासं कुर्यादित्याह **श्रवणादिभिरिति।** जीवः प्रत्यगात्मा एतत् प्रकरणोक्तादस्य श्रवणमननादिभिः उच्चैर्दीप्तः प्रकाशितः ज्ञानमेव अग्निस्तेन परितापितः परितश्शोधितः ज्ञानाग्निना दग्धाशेषतत्कार्य इत्यर्थः। अत एव मलान्मुक्तः स्वयमेव सम्यक् प्रकाशते अखण्डसच्चिदानन्दरूपः प्रकाशते। यथाग्निना परितापितं स्वर्णं औपाधिकदुर्वर्णादिकं हित्वा स्वयमेव सम्यक् प्रकाशते तद्वदित्यर्थः।।64।।

हृदाकाशोधितो ह्यात्मा बोधभानुस्तमोपहृत्।
सर्वव्यापी सर्वधारी भाति सर्वं प्रकाशते।।65।।

व्या - एवं शोधितः प्रत्यगात्मा हृदाकाशे ब्रह्मान्तःकरणवृत्तौ उदितः प्रतिबिम्बितः स्वस्वाशयतमो-रूपाज्ञानमुपसंहरन् भानुवत् सर्वस्वरूपः प्रकाशत इत्याह। बोध एव भानुः प्रकाशरूपत्वात् सर्वस्याधारभूतत्वात् सर्वव्यापी सर्वं व्याप्य स्थितः सर्वधारी च । शिष्टं स्पष्टम्।।65।।

दिग्देशकालाद्यनपेक्ष्य सर्वगं
शीतादिहृन्नित्यसुखं निरुत्तमम्।
यस्त्वात्मतीर्थं भजते विनिष्क्रिय-
स्स सर्ववित्सर्वगतोऽमृतो भवेत्।।66।।

व्या - ननु आत्मज्ञानप्रतिबन्धकदुरितपरिहारार्थं प्रयागादि-तीर्थनदीयात्रोद्योगः कर्तव्य इत्याशङ्क्य आत्मतीर्थे स्नातस्य न

In Public domain. Digitization Muthulakshmi Research Academy

किञ्चित् कर्तव्यमित्याह **दिग्देशेति**। यो विनिष्क्रियः परमहंसः स्वात्मतीर्थं भजते सेवते सर्ववित् सर्वज्ञः सर्वतः परमार्थसरूपत्वादमृतो मुक्तो भवेत्कथंभूतः स्वात्मतीर्थं दिग्देशकालाद्यनपेक्ष्यैव सर्वगं शीतादिद्वन्द्वदुःखादीनि हरतीति शीतादिहृत्प्रसिद्धगङ्गातीर्थं ततो उदीचीन्दिशं काश्यादिदेशं च अर्थोदयादिकालं च अपेक्ष्यते। इदं तु न तथा। बाह्यतीर्थं तु प्रादेशकमिदं सर्वगतं बाह्यतीर्थं तु शीतादिभिः सहितम्। इदं तु तद्विपरीतकबाह्यतीर्थं तु घर्मकाले सुखकरम्। इदं तु नित्यसुखम्। बाह्यतीर्थं तु उत्तरोत्तरं सातिशयम्। इदं तु निरुत्तरमन्तर्गतं उत्तममस्मादिति बाह्यतीर्थस्नायिनः क्षेत्रपिण्डादिक्रियापेक्षा विद्यते। एतत्स्नायिनः तु नास्ति। बाह्यतीर्थस्नायीतु किञ्चित् ज्ञः प्रादेशिकः मरणधर्मश्च भवति। एतत् स्नायीतु तद्विपरीत इति बाह्यतीर्थस्य वैलक्षण्यमुक्त्वा एतद्ज्ञानस्नानमेव कर्तव्यमित्युपसंहृतं वेदितव्यः।।66।।

उपादानेऽखिलाध्वारे जगन्ति परमेश्वरे।
सर्गस्थितिलयं यान्ति बुद्बुदा इव वारिणः।।67।।

इति श्रीपरमहंसपरिव्राजकाचार्यवर्यगोविन्दभगवत्पादशिष्य-
श्रीमच्छङ्करभगवत्पादाचार्यविरचितात्मबोधप्रकरणं
समाप्तिमगमत्।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीगुरुपरमात्मने नमः

In Public domain. Digitized by Muthulakshmi Research Academy

कैवल्योपनिषद्दीपिका समूला

कैवल्योपनिषद्दीपिका प्रारभ्यते। ऑम् सहनाववतु। सहनौ भुनक्तु। सहवीर्यं करवावहै। तेजस्विनावधीतमस्तु माद्विषावहै। ओम् शान्तिश्शान्तिश्शान्तिः।।

मू - अथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच। अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां सदा सद्भिस्सेव्यमानां निगूढाम्।।1।।

व्याख्यानम् – हरिः ओम्

कैवल्याख्योपनिषदं कैवल्यार्थाय बोधिनीम्।
व्याख्यास्ये केवलस्तेन कैवल्यात्मा प्रसीदतु।।

भगवतीश्रुतिः सुखप्रतिपत्यर्थं कञ्चनाश्वलायनं निमित्तीकृत्य आख्यायिकामवतारयति ब्रह्मविद्यायामास्तिक्यं जनयितुम्। अथ साधनचतुष्टयसम्पत्यनन्तरं आश्वलायनः ऋग्वेदाचार्यः भगवन्तं पूजावन्तं परमेष्ठिनं सर्वोत्कृष्टस्थाननिवासिनं परिसमेत्य शास्त्रीयेण विधिना समीपमागत्योवाच। उक्तवानधीहि भगवन्ननुग्रहार्थं स्मर भगवन् हे समग्रधर्मज्ञानवैराग्यैश्वर्ययशश्श्रीमन् ब्रह्मविद्यायां ब्रह्मणो देशकालवस्तुपरिच्छेदशून्यस्य विद्याबुद्धिस्तत्साक्षात्कारकारिणीं वरिष्ठामतिशयेन श्रेष्ठां सदा नित्यं सद्भिर्देहादिष्वात्मभेदबुद्धि-शून्यैस्सेव्यमानां हृदयेन्द्रियमाणां निगूढां सर्वभूतेष्वात्मनो विद्यमानत्वेन विद्यमानाप्यविद्यया नितरां संवृताम्।।1।।

मू– यया चिरात्सर्वपापं व्योपह्य परात्परं पुरुषमुपैति विद्वान्। तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयोगादवेहि।।2।।

 In Public domain. Digitization Muthulakshmi Research Academy

व्या – यया ब्रह्मविद्यया चिरात् दीर्घकालेन सर्वपापं निखिलं दुःखकारणमज्ञानं संस्कारं व्यपोह्य विविधं परित्यज्य विनाश्येत्यर्थः। परात्परमुत्कृष्टादपि उत्कृष्टतमं पुरुषं परिपूर्णमुपैति प्राप्नोति विद्वान् अहमेव सोहमस्मीति साक्षात्कारवान्। एवं सृष्टः कस्मै शिष्याय ब्रह्मविद्यार्थिने स गुरुस्सर्वज्ञः किलोऽवाच। उक्तवान् पितामहश्च जगत्कर्तृणां दक्षादीनां पिता पितामहः कमलासनः चकारोप्यर्थः। स पितामहोप्युवाच। न तूपेक्षां कृतवानित्यर्थः। ब्रह्मविद्यायास्साक्षाद्वक्तुमशक्यत्वात् तदर्थस्य ब्रह्मणो वाङ्मनसातीतत्वादत उपायान्तरमाह श्रद्धाभक्तिध्यानयोगात्। श्रद्धा आस्तिक्यबुद्धिर्भजनं तदेकतात्पर्यबुद्धिः। ध्यानं विजातीयप्रत्यय-शून्यसजातीयप्रत्ययप्रवाहः। ये तेषां योगस्सम्बन्ध एतत्कारणमिति यावत् तस्मादवेहि जानीहि।2।।

मू – न कर्मणा न प्रजया धनेन त्यागे नैके अमृतत्वमानशुः।
परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति।।3।।

व्या – इदानीं यथा श्रद्धाभक्तिध्यानयोगो ब्रह्मविद्यायां कारणं तद्वत् सन्यासोऽपीत्याह। न कर्मणा श्रौतेन स्मार्तेन वा न प्रजया पुत्रादिना धनेन दैवेन मानुषेण वा वित्तेन नेति पूर्वमनुषज्यते अमृतत्वमिति वक्ष्यमाणानुषङ्गः कर्म प्रजाधनपरेष्ववगन्तव्यः। त्यागेन निखिलश्रौतस्मार्तकर्मपरित्यागेन परमहंसाश्रमरूपेण ये के महात्मानः सम्प्रदायविदः अमृतत्त्वं अविद्यादिमरणभावराहित्यम् आनशुः अनशिरे प्राप्ताः। एवं कृते सन्यासे परेण परस्तात् नाकं कं सुखं तद्विरोधिदुःखमकं नाकं अस्मात् नाकात् स्वर्गस्योपरीत्यर्थः।

In Public domain. Digitization Muthulakshmi Research Academy
अथवा परेण परं नाकमानन्दात्मानं निहितं प्रक्षिप्तं धातृगुहायां बुद्धौ विभ्राजते विशेषेण स्वयं प्रकाशत्वेन दीप्यते। यत्प्रसिद्धं विश्वव्यापिस्वरूपं यतयः कृतसन्यासाः प्रयत्नवन्तो ब्रह्मसाक्षात्कारेण तदेव भवन्तीत्यर्थः।।3।।

मू – वेदान्तविज्ञानसुनिश्चितार्थास्सन्यासयोगाद्यतयश्शुद्धसत्वाः। ते ब्रह्मलोकेषु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे।।4।।

व्या – यतीनां विशेषणान्याह वेदान्तविज्ञानसुनिश्चितार्थाः वेदान्ताः प्रसिद्धास्तेभ्यो जातं विज्ञानं विशिष्टमहं ब्रह्मास्मीति ज्ञानं तस्मिन् एव सुनिश्चितो अर्थः प्रयोजनं येषां ते। अथवा सुनिश्चितो यमहमेवेति सम्यगवधारितो ब्रह्मलक्षणाभिधेयो यैस्ते। वेदान्तविज्ञानसुनिश्चितार्थाः सन्यासयोगात् सम्यक् वा अन्तविष्ठादिवत् लोकद्वयभोग्यस्य न्यासः त्यागः सन्यासस्तस्य योगो हंसं न्यासोऽस्मीति यो बोधस्तस्माद्यतयः, व्याख्यातं पुनरादानं विशेषत्वकथनार्थं शुद्धसत्वाः शुद्धं रागादिकषायरहितं सत्वमन्तःकरणं येषां ते शुद्धसत्वाः। एवं भूता अपि कुतश्चित् प्रतिबन्धात् अस्मिन् शरीरे अनुत्पन्नसाक्षात्काराश्चेत्तदा ते उक्ताः यतयः ब्रह्मलोकेषु ब्रह्मणः कार्यस्येतस्मिन्नेव लोके भूमिप्रासादवत्। अथ उपर्यादिभागेनावस्थिता बहवो एते नाभिधीयन्ते तेषु परान्तकाले परस्य कार्यस्य ब्रह्मणः अन्तकालो विनाशकालोप्यपरार्धावसानं परान्तकालस्तस्मिन् परावृतात् उत्कृष्टादमरणधर्मणो व्याकृतात्परिमुच्यन्ते विमुच्यन्ते सर्वतो मुक्ता

 In Public domain. Digitization Muthulakshmi Research Academy

भवन्ति। सर्वे निखिलाः ब्रह्मणा सह ते सर्वे इह प्राप्ताप्रतिसञ्चरे परस्यान्ते कृतात्मनः प्रविशन्ति परं पदमिति।।4।।

मू – विविक्तदेशेषु सुखासनस्थश्शुचिः समग्रीवशिरश्शरीरः। अत्याश्रमस्थस्सकलेन्द्रियाणि निरुध्य वक्त्या स्वगुरुं प्रणम्य।।5।।

व्या – इदानीं ब्रह्मज्ञानावाप्त्यर्थमुपासनां कर्तुमुपदेशनार्थं देशविशेषादिकमाह। विविक्तदेशे एकान्तप्रदेशे च शब्दादव्याकुल-कालेऽपि सुखासनश्शुचिः बहिरन्तश्शौचवान् समग्रीवशिरः समग्रीवाचशिरश्च शरीरं च यस्य समग्रीवशिरश्शरीरः। ऋजुकायः पद्मकाद्यासनस्थ इत्यर्थः। अत्याश्रमस्थः अत्यधिकः ब्रह्मचारिगृहस्थवानप्रस्थकुटीचरबहूदकहंसेभ्यः आश्रमः परमहंस-लक्षणोऽत्याश्रमस्तस्मिन् तिष्ठतीत्यत्याश्रमस्थस्सकले-न्द्रियाणि निखिलानि समनस्कानि ज्ञानकर्मेन्द्रियाणि निरुध्य स्वस्य प्रचारेभ्योऽवरुध्य भक्त्या देववत् देवाधिक्याद्वा स्वगुरुं स्वस्य तत्त्वमसीत्यर्थस्यावबोधकं प्रणम्य प्रकर्षेण नत्वा निरन्तरम्।।5।।

मू – हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्यमध्ये विशदं विशोकम्। अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम्।।6।।

व्या – हृत्पुण्डरीकं हृदयकमलं पञ्चछिद्रादिविशेषणं विरजं विरजस्कं अपगतरागद्वेषादिकं विशुद्धं विगतसमस्तदुःखादिदोषं विचिन्त्य विशेषेण ध्यात्वा मध्ये हृदयपुण्डरीकस्यातः विशदं निर्मलं शुद्धस्फटिकसङ्काशमित्यर्थः। विशोकं विगतशोकं विशोकं आनन्दपूर्णहृदयं स्मेराननं चेत्यर्थः। वस्तुतस्तु अचिन्त्यं वाङ्मानसातीतत्वेन प्रत्ययसन्ततविषयम्। वाङ्मनोतीतत्वे

In Public domain. Digitization Muthulakshmi Research Academy

हेतुरव्यक्तम्। शब्दाद्यशेषं विशेषशून्यत्वादस्पष्टमव्यक्तम् अनन्तं परिच्छेद्यत्वं वारयति। अनन्तरूपं न विद्यते अन्त इयतारूपाणां शरीराणां यस्य सोऽनन्तरूपस्तं देशकालवस्तुपरिच्छेदशून्यं वा अनन्तरूपं शिवं मङ्गलरूपं प्रशान्तमविद्यादिदोषरहितममृतं कालत्रयासंस्पृष्टं अमृतवद्वा निरतिशयानन्द रूपत्वेन ब्रह्म बृहत्सर्वस्मादभ्यदिकं योनिं जगज्जन्मादिकारणम्।।6।।

मू – तथादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम्।
उमासहायं परमेश्वरं हरिं त्रिलोचनं नीलकण्ठं प्रशान्तम्।।7।।

व्या – तथा यथैतद्विशेषेण जातं यद्वत् स्वरूपमपि आदिमध्यान्तविहीनम् उत्पत्तिपरिच्छेदविनाशवर्जितं तत्र हेतुरेकं द्वितीयप्रकाशमानं निरतिशयानन्दमरूपं चिदानन्दव्यतिरिक्तरूप-रहितं तत अद्भुतमाश्चर्यम् उमासहायमुमा ब्रह्मविद्यासहायन्तस्या आदिरक्षिता यस्य अर्धनारीशरीरत्वेन वामाङ्कस्थिता भवति। अनुपमयुवतिरूपत्वेन वा यस्य उमासहायस्तं परमेश्वरं उत्कृष्ट-ब्रह्मादिनियन्तारं प्रभुं समर्थं त्रिलोचनं त्रीणि सोमसूर्याग्नात्मकानि लोचनानि यस्य त्रिलोचनस्तम्। यद्वा त्रयाणां विश्वतैजसप्राज्ञानां विराड्ढिरण्यगर्भेश्वराणां वा स्वयं प्रकाशत्वेन लोचनं प्राकाशरूपं त्रिलोचनः तम्। नीलकण्ठं नीलं तम अज्ञानं कण्ठे कण्ठवच्चिदेकदेशोऽपि व्यापित्वेन चैतन्यस्य वर्तते यस्य स नीलकण्ठस्तं प्रकाशं तं प्रसन्नवदनवदने दिष्टम्।।7।।

In Public domain. Digitization Muthulakshmi Research Academy

मू – ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसःपरस्तात्। स ब्रह्म स शिवस्सेन्द्रस्सोऽक्षरः परमस्स्वराट्। स एव विष्णुस्स प्राणस्सकालाग्निस्स चन्द्रमाः स एव सर्वं यद्भूतं यच्चभव्यं सनातनम्।।8।।

व्या – ध्यात्वा सजातीयप्रत्ययप्रवाहेण साक्षात्कृत्य मुनिः मननशीलः गच्छति प्राप्नोति। भूतयोनिमाकाशादिभूतकारणं तर्हि किं कारणत्वोपाधिकमित्याशङ्क्य नेत्याह। समस्तसाक्षिणं सर्वबुद्धिप्रचारद्रष्टारं साक्षित्वमपि न केवलस्येत्यत आह। तमसः आवरणविक्षेपरूपायाः अविद्यायाः परस्तात् परतः अविद्यासम्बन्धशून्यमित्यर्थः। उमासहायं उमासन्नतः प्रथमो निरवद्यो विद्यादशायां सर्वात्मेत्यत आह- उक्तः। ब्रह्म प्रथमशरीरकार्यकारणभूतस्स उक्तशिवः उमासहायः सेन्द्रस्स उक्तः इन्द्रस्त्रिलोकपतिः स उक्तः अक्षः विनाशरहितः परमः उत्कृष्टः स्वराट् अन्यानपेक्षत्वेन स्वयमेव राजत इति स्वराट्। स एव उक्तः स एव विष्णुः व्यापनशीलः शङ्खचक्रगदाधरः स उक्तः प्राणः प्राणादिपञ्चवृत्तिरूपस्स उक्तः कालाग्निः कालरूपवैश्वानरः स उक्तः सर्वं निखिलं यत्प्रसिद्धं भूतमतीतं यच्छ यदपि भव्यं भावि चकाराद्वर्तमानमपि सनातनं चिरन्तनम्।।8।।

मू– ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये।
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
सम्पश्यन् ब्रह्म परमं याति नान्येति हेतुना।। 9।।

In Public domain. Digitization Muthulakshmi Research Academy

व्या – ज्ञात्वाहं ब्रह्मास्मीति साक्षात्कृत्य तमुक्तमानन्दात्मानं मृत्युम् अविद्यां स संस्कारामत्येति अतीत्य गच्छति। अन्यः उक्तब्रह्मज्ञानाद्व्यतिरिक्तः पन्थाः मार्गः विमुक्तये विमुक्त्यर्थं न अस्तीति शेषः। सर्वभूतस्थं निखिलेषु तिष्ठतीति सर्वभूतस्थस्तं अस्मत्प्रत्ययव्यवहारयोग्यं सर्वभूतानि च निखिलानि स्थावरजङ्गमानि भूतानि। चकारः आधाराधेयभावव्युत्क्रमार्थः आत्मनि आनन्दात्मन्यहं प्रत्यययोग्ये सम्पश्यन् सम्यक् संशयविपर्ययरहिते अनवलोकयन् ब्रह्म बृहद्देशकालवस्तु-परिच्छेदशून्यं परमं उत्कृष्टमनुपचरितमित्यर्थः। याति प्राप्नोति यातीति देहलीदीपन्यायेन सम्बध्यते न याति न प्राप्नोति। अन्येनोक्तबोधव्यतिरिक्तेन हेतुना कारणेन ध्यात्वा मुनिर्निर्गच्छतीत्यस्य व्याख्यानं ज्ञात्वा तमित्यादि नान्यः पन्था विमुक्तय इत्यस्य व्याख्यानं त्विदं सर्वभूतस्थमित्यादि हेतुनेत्यन्तम्।।9।।

मू – **आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्।**
ज्ञाननिर्मथनाभ्यासात्पाशं दहति पण्डितः।।10।।

व्या – वदत्वेतज्जन उपायाभावात् नोपपद्यत इति चेत् तदा तदुत्पादने उपायमाह आत्मानमन्तःकरणं वह्निजनकं मन्त्रसंस्कृतं काष्ठं कृत्वा अथो विधाय अधरारणित्वेन चिन्तयित्वेत्यर्थः। प्रणवम् ओङ्कारं चोत्तरारणिमपि चकारः कृत्वेत्येतदनुवृत्त्यर्थः। ज्ञाननिर्मथनाभ्यासात् ज्ञानस्य सर्वात्मकोऽहमस्मीत्येवं रूपस्य मन्थोनिर्मथनं युक्तिभिर्विलोडनं तस्याभ्यास आवृत्तिरूपो

ज्ञाननिर्मथनाभ्यासस्तस्मादुत्पन्नेनाहं ब्रह्मास्मीति साक्षात्काराग्निना पाशं आत्मनो बन्धनरूपमज्ञानरज्जुरचितमहम्ममादिग्रन्थिं दहति भस्मीकरोति पण्डितः। अहं ब्रह्मास्मीति बुद्धिसारं प्राप्तः पण्डितः।।10।।

मू– स एव माया परिमोहितात्मा शरीरमास्थाय करोति सर्वम्।
स्त्रीयन्नपानादिविचित्रभोगैस्स एव जाग्रत्परितृप्तिमेति।।11।।

व्या – स एव उक्तो सङ्गोदासीन एव नत्वन्यः मायापरिमोहितात्मा माया विद्या आवरणविक्षेपकरी शक्तिः तया परिमोहितः स्वयं प्रकाश आनन्दात्मस्वरूपो मायापरिमोहितात्मा शरीरं स्थूलादिभेदभिन्नं मनुष्यादिकेवलेदमास्थाय अहं मनुष्य इत्याद्यभिमानमासमन्तात्स्वीकृत्य करोति सर्वं निखिलं व्यापारजातं कुरुते। स्त्रीयन्नपानादिर्विचित्रभोगैः स्त्रियो मनोनुकूला युवतयः अन्नपाने मनोनुकूले आदिशब्देन आसनाच्छादनानि मनोनुकूलानि तैः स्त्रीयन्नपानादिभिर्विविधैर्भोगैः स्त्रियन्नेत्यादिच्छान्दसं स एव मायौपरिमूढ एव नत्वन्यः। जाग्रत् जागरणं इन्द्रियैर्बाह्यविषयोपलब्धिरूपं कुर्वन् परितृप्तिं सर्वतो विषयसुखजा तृप्तिः परितृप्तिस्तामेति गच्छति सुखदुःखं च प्राप्नोतीत्यर्थः।।11।।

मू– स्वप्ने स जीवस्सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके।
सुषुप्तिकाले सकले विलीने तमोभिभूतस्सुखरूपमेति।।12।।

व्या – इदानीं स्वप्नसुषुप्त्योः विक्षेपस्तदभावकथनेन संसारमोक्षयोरथादिदृष्टान्तमाह **स्वप्न** इति। इन्द्रियग्रामो परमरूपायां स्वप्नास्थायां स जीवः प्राणानां धारयित्वा विविधविषयवासनावासित

In Public domain. Digitization Muthulakshmi Research Academy

स्सुखदुःखभोक्ता तत्र संसारदृष्टान्ते वास्तवत्वं वारयति। स्वस्य तत्तद्देहाभिमानिनो माया अज्ञानं विपरीतज्ञानं च तया कल्पितविश्वलोके कल्पिते वासनारूपे विश्वस्मिन् रथयोगपराधिके निखिले लोके भुवने जने च कल्पितविश्वलोके स्वप्ने यथा तद्वज्जागरणेऽपीत्यर्थः। सुषुप्तिकाले आनन्दभोगावसरे लोके सकले निखिले निलीने विशेषविज्ञाने स्वकारणे लयङ्गते एतावत्सुषुप्तौ मोक्षे च समम्। इयांस्तु विशेषः ततोभिभूतः अनावृतस्सुखरूपं स्वस्वरूपं स्वयं प्रकाशमानमानन्दात्मस्वरूपम् एति गच्छति।।12।।

मू – पुनश्च जन्मान्तरकर्मयोगात्स एव जीवस्स्वपिति प्रबुद्धः। पुरत्रये क्रीडति यश्चजीवस्ततस्तु जातं सकलं विचित्रम्।।13।।

मू– आधारमानं तमखण्डबोधं यस्मिन् लयं याति पुरत्रयं च।14।।

व्या – पुनश्च आनन्दात्मस्वरूपं प्राप्य भूयोऽपि जन्मान्तर-कर्मयोगात्प्राग्भावीयकर्मानुसारात्स एव आनन्दात्म-स्वरूपं प्राप्त एव सुषुप्तिङ्गतो नत्वन्यः जीवः प्राणविधारकः स्वपिति स्वप्नावस्थाङ्गच्छति। सुषुप्तादतः प्रबुद्धः प्रबोधजागरणं प्राप्ता भवतीति शेषः। इदानीं जीवब्रह्मणोरैक्यमाह। पुरत्रये स्थूलसूक्ष्माज्ञानाख्ये शरीरत्रये क्रीडति विहरति। यश्च जीवश्चकार एवकारार्थः प्रसिद्धपरमात्मैव प्राणधारकः। ततस्तु तस्मादेव जीवाभिन्नत्वाद्यस्माज्जातमुत्पन्नं सकलं विचित्रं विविधकर्मनामरूपं विश्वम् आधारं रज्जुरिव सर्वाधाराबलीवर्धमूर्तित्वादेस्सकलस्य विश्वस्याधारभूतमानन्दं निरतिशयानन्दस्वरूपमखण्डबोधमानन्द-

 In Public domain. Digitization Muthulakshmi Research Academy

स्वरूपत्वेन स्वयं प्रकाशैकस्वभावं यस्मिन्नखण्डबोधे लयं विनाशं याति गच्छति पुरत्रयं व्याख्यातं च शब्दादन्यदपि।।13, 14।।

मू– एतस्मात् जायते प्राणो मनस्सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी।।
यत्परं ब्रह्मसर्वात्मा विश्वस्यायतनं महत्।
सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत्।।15।।

व्या – एतस्मात् पुरत्रयाधिष्ठानाद्बुद्धेर्द्रष्टुर्जायते उत्पद्यते प्राणः क्रियाशक्तिः मनः अन्तःकरणज्ञानशक्तिस्सर्वेन्द्रियाणि च शब्ददेहादिकमपि खं नभः वायुः नभस्वान् ख्यातिः तेजोधातुः आपः नीराणि पृथिवी भूमिः विश्वस्य निखिलस्य स्थावरजङ्गमात्मकस्य प्राणिजातस्य धारिणी इदानीं महावाक्यार्थमाह। यत्प्रसिद्धं परमुत्कृष्टं ब्रह्मबृहद्देशकालस्तु परिच्छेदशून्यं सर्वात्मा सर्वप्राणिहृदि स्थितस्सर्वानन्यश्च विश्वस्य कार्यकारणजातस्य आयतनमाधारभूतं महत् प्रौढं सर्वाधारत्वेनैव सूक्ष्मादणुपरिमाणात्सूक्ष्मतरं महदप्यतिशयेनाणु नित्यं विनाशशून्यं तदुक्तं परब्रह्मत्वमेव तद्भतैव नत्वन्यत्। ननु तन्मत्तोऽन्यत् अहं तु तस्मादन्यः मयि कर्तृत्वादि विशेषोपलम्भादित्यत आह त्वं कर्ता भोक्ताऽविद्यया वस्तुतस्तत्परं ब्रह्मैव नत्वन्यः।।15।।

मू– जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते।।16।।

व्या – इदानीमेव ज्ञाने फलमाह। जाग्रत्स्वप्नसुषुप्त्यादि-प्रपञ्चं जाग्रत्स्वप्नसुषुप्तय उक्तास्तदादयो विश्वविराडादयस्त एव

In Public domain. Digitization Muthulakshmi Research Academy

प्रपञ्चो जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चः। तं यत् प्रसिद्धं स्वयं प्रकाशं प्रकाशयति तदुक्तं स्वयं प्रकाशं ब्रह्मसत्यज्ञानादिलक्षणं अहं ब्रह्मानवरतं सच्चिदानन्दात्मा इत्यनेनाकारेण ज्ञात्वा साक्षात्कृत्य सर्वबन्धैः निखिलबन्धैरहमाद्यैरेव सकारणैः प्रमुच्यते प्रकर्षेण मुक्तो भवति।।16।।

मू – त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्।
तेभ्यो विलक्षणस्साक्षी चिन्मात्रोऽहं सदाशिवः।।17।।

व्या – इदनीं सर्वप्रपञ्चाद्वैतमाह। त्रिषु जागरणस्वप्नसुषुप्तिषु धामसु स्थानेषु यत् प्रसिद्धं भोग्यं स्थूलं प्रविविक्तानन्दरूपं भोक्ता विश्वतैजसप्राज्ञाख्यः भोगश्च स्थूलप्रविविक्तानन्दभोगोऽपि च शब्दादधिदैवादिविभागो यदुक्तं त्रिधामभोग्यादिप्रपञ्चजातं भवेत्। स्पष्टं तेभ्यः त्रिधामादिभ्यः विपरीतलक्षणः वैलक्षण्यमाह साक्षिस्वाध्यस्तस्य विश्वस्य द्रष्टा चिन्मात्रश्चिदेकरसः अहम् अहम्प्रत्ययव्यवहारयोग्यः सदाशिवः कैवल्यात्मा नित्यकल्याणरूपो महेश्वरः।।17।।

मू – मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्।।18।।

मू - अणोरणीयानहमेव तद्वन्महानहं विश्वमिदं विचित्रम्।।19।।

व्या – प्रपञ्चवैलक्षण्यमुक्त्वा इदानीं जगज्जन्मादि-कारणत्वमपि स्वस्याह। मय्यैव मत्त एव ब्रह्माभिन्नात् नत्वन्यस्मात्सकलं निखिलं भूतभौतिकप्रपञ्चजातमुत्पन्नं मयि सर्वं व्याख्यातं लयं याति विनाशं गच्छति तत्। तस्मात्सर्वं

जगज्जन्मस्थितिध्वंसकारणत्वात् ब्रह्म बृहद्देशकालवस्तुपरिच्छेद-शून्यम् अद्वयं ज्ञातृज्ञेयादिविभागशून्यमस्मि भवामि। अहं ब्रह्मणोवगतजगज्जन्मस्थितिध्वंसकारणत्वात् जगत्कारणत्वेन विकारत्वं प्राप्तं तदेतदिति दुर्भोधस्वरूपत्वेन वारयति। अणोः अणुपरिमाणादतिशयेनाणुरहितमेव जगत्कारणमहं प्रत्ययव्यवहार-योग्यो नत्वन्यः। तद्वत् यथा अणुस्तथा महान् सर्वस्मादभ्यधिकः अहं व्याख्यातं अणीयान् महतां कारणानां च यथा भेदस्तथा तवापि स्यादित्यत आह। विश्वं साविद्यभूतभौतिकप्रपञ्चजातं अहं व्याख्यातं अस्वतत्वभेदराहित्ये स्वस्मादप्यभेदस्स्यादित्यत आह विचित्रं विविधं स्वयमनन्तराहित्ये स्वस्मादप्यभेदस्स्यादित्यत आह विचित्रं विविधं स्वयमनन्तभेदवदित्यर्थः।। 18-19।।

मू – पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि।
अपाणिपादोऽहमचिन्त्यशक्तिः पश्याम्यचक्षुस्स श्रुणोम्यकर्णः।
अहं विजानामि विविक्तरूपो स चास्ति वेत्ता मम चित्सदाहम्।20।

व्या – तदभिन्नस्य तस्य तवाप्याधुनिकत्वं स्यादित्यत आह। पुरातनः चिरन्तनः आधुनिकसर्वधाराबलीवर्दमूर्तित्वाद्य-भिन्नाच्चिरन्तनी रज्जुरिवाहं व्याख्यातं पुरुषः परिपूर्णः। वस्तुतः अहं व्याख्यातमविद्यादशायामीशः नियन्ता नियन्तृत्वसामर्थ्यमाह। हिरण्मयः हरिणी यो ज्ञानप्रचुरस्तत्प्रधानो वादित्यस्थस्सर्व-कारणात्माहं व्याख्यातः शिवरूपं मङ्गलस्वरूपं ब्रह्मास्मि। इदानीं सर्वकारणहीनस्य सर्वज्ञत्वं स्वप्याह। अपाणिपादः पाणिपादहीनः अहं व्याख्यातमचिन्त्यशक्तिर्दुर्बोधशक्तिरेवं भूतोऽपि

In Public domain. Digitization Muthulakshmi Research Academy

जवनोगृहीतेत्यर्थः। पश्यामि अवलोकयामि अवक्षुश्चक्षुर्हीनस्स अचक्षुः द्रष्टा शृणोमि श्रवणं करोमि अकर्णः कर्णरहितोऽहं व्याख्यातम्। विजानामि विविधं प्रपञ्चजातमवगच्छामि विविक्तरूपः बुध्यादिपृथग्रूपः न चास्ति नास्त्येव वेत्ता कर्मकर्तृभावेनावगन्ता ममानन्दात्मनो भेदरहितस्य चित्स्वयम्।।20।।

मू – वेदैरनेकैरहमेव वेद्यो वेदान्तकृद्वेदविदेह चाहम्।
न पुण्यपापे मम नास्ति नाशो न जन्मदेहेन्द्रियबुद्धिरस्ति।
न भूमिरापो मम वह्निरस्ति न चानिलो मेस्ति न चाम्बरं च।। 21।।

व्या – इदानीं सर्वशास्त्रप्रतिपाद्यस्यात्मनस्सर्वविकाराभावं दर्शयति। वेदैः ऋगादिभिरनैकैर्बहुभिरहमेव व्याख्यातम्। वेद्यैः प्रतिपाद्यः वेदान्तकृत् वेदान्तसूत्रकृत् वेदव्यासरूपः वेदविदेव च वेदान्तकृतो विशेषणं वेदानां साङ्गमानां सामान्यविद्यास्थानानां वेत्ता वेदवित् स एव नत्वन्यः च। शब्दाद्यनेकतपस्सम्पन्नश्चाहं व्याख्यातमनेन विभूतिवत् सत्वेष्विदमेव प्रधानमित्युक्तं न पुण्यपापे मम इति शेषः। नास्ति नाशः विनाशो न विद्यते ममेत्यनुषङ्गः न जन्मजनुर्नास्तीत्यनुषङ्गः। देहेन्द्रियबुद्धिर्देहेन्द्रियाणि च बुद्धयश्च देहेन्द्रियबुद्धिः। नास्ति न विद्यते ममेत्यनुषङ्गः। न भूमिरापो मम पृथिवीसोदका मम नास्तीत्यनुषङ्गः। वह्निः प्रसिद्धः नास्ति न विद्यते ममेत्यनुषङ्गः न चानिलो मेऽस्ति वायुरपि मम न विद्यते चकाराद्वायवीयं कार्यमपि न चाम्बरं च अम्बरमपि न ममास्तीत्यनुषङ्गश्चकारश्चाकाशकार्यतद्यतिरिक्तभावार्थौ।।21।।

In Public domain. Digitization Muthulakshmi Research Academy

मू – **एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम्।**
समस्तसाक्षिं सदसद्विहीनं प्रयातिशुद्धं परमात्मरूपम्।।
यश्शतरुद्रीयमधीते सोऽग्निपूतो भवति सुरापानात्पूतो भवति।22।।

व्या – एवमुक्तेन प्रकारेण विदित्वा साक्षात्कृत्य परमात्मरूपमुत्कृष्टानन्दात्म स्वरूपं गुहाशयं बुद्धौ शयानं निष्कलं निर्गताः प्राणश्रद्धा खं वायुर्ज्योतिरापः पृथिवीन्द्रियमनोन्न वीर्यतपोमन्त्रकर्मलोकनामाख्यकला यस्मात्तमद्वितीयं सजातीय-विजातीयवस्तुशून्यं समस्तसाक्षिणं सर्वद्रष्टारं सदसद्विहीनं भावाभावविवर्जितं तदेव निरवद्यं गच्छतीत्याह। प्रयातिशुद्धं परमात्मरूपं स्पष्टमेवंभूतं परमात्मानं प्रतीपत्तुमशक्तस्य अशुद्धान्तःकरणस्यान्तःकरणशुध्यर्थमाह यः प्रसिद्धो मुमुक्षुरनुत्पन्नसाक्षात्कारश्शतरुद्रीयं नमस्ते रुद्र इत्यादि रुद्राध्यायम् अधीते पठति यथाशक्ति नित्यं सः शतरुद्रीयाध्यायकः। अग्निपूतः अग्निभिश्श्रौतैः स्मार्तैः पवित्रीकृतोऽग्निपूतो भवति स्पष्टम्। सुरापानात् मदिरापानात् महापातकदोषात्पूतो भवति स्पष्टम्।।22।।

मू – **ब्रह्महत्यात्पूतो भवति कृत्याकृत्यात्पूतो भवति।**
तस्मादविमुक्तमाश्रितो भवति अत्याश्रमी सर्वदा सकृद्वा
जपेत् अनेन ज्ञानमाप्नोति संसारार्णव नाशनम्।।23।।

व्या – ब्रह्महत्यात् ब्रह्महत्यायाः ब्रह्महत्यरूपान्महा-पातकमोक्षात्पूतो भवति स्पष्टम्।कृत्याकृत्यं करणीयं बुद्धिपूर्वकं पापमकृत्यमबुद्धिपूर्वं पापं कृत्यं चाकृत्यं च कृत्याकृत्यं तस्मात्पूतो

In Public domain. Digitization Muthulakshmi Research Academy

भवति, स्पष्टम्। तस्माच्छतरूद्रीयाध्ययनादविमुक्तं विरुद्धत्वेन मुक्ताः पशवस्तेभ्यो व्यतिरिक्तो विमुक्तः पशुपतिस्तमाश्रितो भवति। स्पष्टम्। अत्याश्रमी अत्याश्रम उक्तः पारमहंस्यलक्षणः स यस्यास्ति सोऽत्याश्रमि अत्याश्रम उक्तः सर्वदा निरन्तरं सकृद्वा कदाचिद्वा दिवसे एकवारमित्यर्थः। वा शब्दो अधिकारिसामर्थ्यानुसारेण व्यवस्थितविकल्पार्थः। अनेन रुद्राध्यायजपे ज्ञानम् अहं ब्रह्मास्मीति साक्षात्काररूपमाप्नोति प्राप्नोति संसारार्णवनाशनं संसारसागर-शोषणम्।।23।।

मू – तस्मादेवं विदित्वैनं कैवल्यं फलमश्नुते। कैवल्यं फलमश्नुत इति।।24।।

व्या – यस्मात् रुद्राध्यायजपे नाशो पापनिबर्हणद्वारा ब्रह्मज्ञानहेतुः तस्मात्तत एवं विदित्वा उक्तेन प्रकारेण त्रिणेत्रध्यान-रूद्राध्यायाध्ययनादिना विदित्वा साक्षात्कृत्य एवं परमात्मानं केवलता आत्मनो भावः। कैवल्यं तत्फलं पुरुषाभिलाषविषयं सर्वपुरुषार्थसमाप्तिभूतमश्नुते प्राप्नोति। कैवल्यं फलमश्नुते व्याख्यातम्, पादाभ्यास उपनिषदर्थपरिसमाप्त्यर्थः।।24।।

इति श्रीपरमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य शङ्करानन्दभगवतः कृतिः कैवल्योपनिषद्दीपिका समाप्ता।।

श्लो – श्रीमच्छन्नपुरीवासि श्रीकल्याणमनीषिणा।
चिरञ्जीयात्कृतिरियं यथामति सुशोधिता।।
द्रष्टुं किमपि लोकेऽस्मिन् न निर्दोषं न निर्गुणम्।
अवृणुध्वमतो दोषान्विवृणुध्वं गुणान् बुधाः।।

।।श्रीसाम्बसदाशिवार्पणमस्तु।।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2022